# જિલ્લા શિક્ષણાધિકારીની કચેરી સુરત

બ્લોક-એ,ત્રીજો માળ, જિલ્લા સેવા સદન-૨ અઠવાલાઈન્સ સુરત- ૩૯૫૦૦૧

:- ૦૨૬૧-૨૬૬૨૯૦૨

:- suratdeo@gmail.com web :-www.suratdeo.or


જા.નં.મા-૨/૨૦૨૫/ 11167 તા.૧૬/૦૯/૨૦૨૫

પ્રતિ,
આચાર્યશ્રી,
માધ્યમિક અને ઉચ્ચતર માધ્યમિક શાળાઓ, તમામ
સુરત.જિ.સુરત

**વિષય**:- સંસ્કૃત પાઠશાળામાં પૂર્વ મધ્યમા (ધોરણ-૯) અને ઉત્તર માધ્યમા (ધોરણ-૧૨) માં પ્રવેશ મેળવવા માંગતા વિદ્યાર્થીઓ માટે "સેતુ પાઠ્યક્રમ" (બ્રીજકોર્સ) બાબત.

**સંદર્ભ**:- ગુજરાત માધ્યમિક અને ઉચ્ચતર માધ્યમિક શિક્ષણ બોર્ડ, ગાંધીનગરનો પત્રાંક નં.મઉમશબ/સંશોધન/૨૦૨૫/૨૬૯૬-૨૭૩૧ તા.૧૨/૦૯/૨૦૨૫

ઉપરોક્ત વિષય અને સંદર્ભ અન્વયે જણાવવાનું કે સંસ્કૃત પાઠશાળામાં પૂર્વ મધ્યમા (ધોરણ-૯) અને ઉત્તર માધ્યમા (ધોરણ-૧૨) માં પ્રવેશ મેળવવા માંગતા વિદ્યાર્થીઓ માટે "સેતુ પાઠ્યક્રમ" (બ્રીજકોર્સ) બાબત સામેલ ગુજરાત માધ્યમિક અને ઉચ્ચતર માધ્યમિક શિક્ષણ બોર્ડ, ગાંધીનગરનો તા.૧૨/૦૯/૨૦૨૫ પત્ર અન્વયે તમામ શાળાઓને જણાવવામાં આવે છે.

જિલ્લા શિક્ષણાધિકારી
સુરત.જિ.સુરત

બિડાણ :- ઉક્ત પરિપત્રની નકલ

ક્રમાંક:મ.ઉમશબ/સંશોધન/૨૦૨૫/૨૯૯૬-૩૩૧
ગુજરાત માધ્યમિક અને
ઉચ્ચતર માધ્યમિક શિક્ષણ બોર્ડ,
સેકટર-૧૦ બી, જૂના સચિવાલય પાસે,
ગાંધીનગર. તા.૧૨/૦૯/૨૦૨૫

પ્રતિ,
જિલ્લા શિક્ષણાધિકારીશ્રી,(તમામ),
ગુજરાત રાજ્ય.

વિષય:-સંસ્કૃત પાઠશાળામાં પૂર્વ મધ્યમા (ધોરણ-૯)અને ઉત્તર મધ્યમા (ધોરણ-૧૧)માં પ્રવેશ મેળવવા માંગતા વિદ્યાર્થીઓ માટે "સેતુ પાઠ્યક્રમ" (બ્રીજકોર્સ) બાબત.

સંદર્ભ:- (૧) શિક્ષણ વિભાગનો ઠરાવ ક્રમાંક:સસક/૧૧૨૧/૨૦૪૮/છ તા.૧૭/૧૦/૨૦૨૨
(૨) કમિશ્નરશ્રી શાળાઓની કચેરીનો તા.૦૪/૦૮/૨૦૨૫નો પત્ર ક્રમાંક:૮૬/સંપાશા /વિશિષ્ટ/૨૦૨૫/૧૩૩૨

ઉપરોક્ત વિષય અને સંદર્ભ અન્વયે જણાવવાનું કે સંદર્ભ દર્શિત શિક્ષણ વિભાગના ઠરાવમાં ક્રમ નં-૧ના પેટા ક્રમ (૪)માં આ "સેતુ પાઠ્યક્રમ" સંસ્કૃત પાઠશાળા દ્વારા ૪૦ કલાકના સંસ્કૃત સંભાષણનું પ્રશિક્ષણ કે જે ગુજરાત માધ્યમિક અને ઉચ્ચતર માધ્યમિક શિક્ષણ બોર્ડ દ્વારા તૈયાર કરાવવામાં આવશે તે ફરજીયાત આપવાનું રહેશે. તેમ દર્શાવેલ છે. જે અન્વયે તજજ્ઞો દ્વારા તૈયાર કરવામાં આવેલ "સેતુ પાઠ્યક્રમ" (બ્રીજકોર્સ)ની મંજૂરી શિક્ષણ વિભાગના તા.૨૯/૧૧/૨૦૨૩ના પત્ર ક્રમાંક:ED/૦૫૮૬/૧૧/૨૦૨૩ના પત્રથી મળેલ હતી.

કમિશ્નરશ્રી શાળાઓની કચેરીના સંદર્ભ-૨ દર્શિત પત્ર અન્વયે "સેતુ પાઠ્યક્રમ" (બ્રીજકોર્સ) પૂર્વ મધ્યમા (ધોરણ-૯) અને ઉત્તર મધ્યમા (ધોરણ-૧૧)આ સાથે મોકલવામાં આવે છે. જે આપના તાબા હેઠળની તમામ સંસ્કૃત પાઠશાળાઓ (માધ્યમિક / ઉચ્ચતર માધ્યમિક)ને જાણ તેમજ અમલ સારુ મોકલી આપશો.

સંયુક્ત નિયામક
ગુજરાત માધ્યમિક અને
ઉચ્ચતર માધ્યમિક શિક્ષણ બોર્ડ,
ગાંધીનગર

બિડાણ:-ઉપર મુજબ

નકલ સવિનય રવાના:-
- માન.અધ્યક્ષશ્રી, ગુજરાત માધ્યમિક અને ઉચ્ચતર માધ્યમિક શિક્ષણ બોર્ડ, ગાંધીનગર.

# ગુજરાત માધ્યમિક અને ઉચ્ચતર માધ્યમિક
# શિક્ષણ બોર્ડ, ગાંધીનગર

## સંસ્કૃત માધ્યમ માં પ્રવેશતા વિદ્યાર્થીઓ માટે સેતુ પાઠ્યક્રમ

## ધો.૦૯ (પૂર્વ મધ્યમા)

## અભ્યાસક્રમ સંરચના વર્ષ– 2023

:: લેખક ::

શ્રી ઉત્સવ હરેશચંદ્ર જોષી

ડૉ. મનોજગિરી એન.

શ્રી તપનકુમાર હિંમતલાલ દવે

શ્રી ભાવેશકુમાર ચંદુલાલ જોષી

શ્રી અભિષેક અક્ષયકુમાર ઉપાધ્યાય

# अनुक्रममणिका


| ક્રમ | પાઠનું નામ | પા. નં. |
|---|---|---|
| 1 | सरस्वती वन्दना | 05 |
| 2 | वर्णपरिचय: | 06 |
| 3 | संख्यापठनम-1 | 08 |
| 4 | संख्यापठनम-2 | 09 |
| 5 | तुल्यास्यप्रयत्नं सवर्णम् | 10 |
| 6 | संस्कृतगीतम् | 16 |
| 7 | अत्राद्य | 17 |
| 8 | कालवाचकानि | 20 |
| 9 | समयशिक्षणम् | 21 |
| 10 | परिचय: | 24 |


## सूचना

- पाठ्यक्रममिदं 40 होरात्मकं भविष्यति |
- पाठ्यक्रम: संस्कृत महाविद्यालये कक्षा-प्रथमा-०१ मध्ये प्रवेशार्थं उत्सुकछात्राणां कृते निर्मापितम् अस्ति |
- पाठ्यक्रमान्ते मौखिक-25 गुणात्मिका तथा च लेखित-25 गुणात्मिका परिक्षा भविष्यति |
- परिक्षायां उत्तिर्णतायै 09+09=18 गुणा: आवष्यका: भविष्यन्ति |

## ═श्नपत्रप्रारूपम्

पाठ्यक्रमस्य नाम – सेतुपाठ्यक्रमः

योग्यता- कक्षा 08 उत्तीर्णः गुणाः-50

गुणविभाजनम्

| मौखिकगुणाः | लेखितपरिक्षायाः गुणा | कुलगुणाः |
|---|---|---|
| 25 | 25 | 50 |

मौखिक परीक्षायां काव्यपङ्क्तिं, सङ्कल्पं, परिचयम् एव प्रष्टव्यः |

उत्तीर्णतायै गुणाः

| मौखिकपरीक्षायाम् | लेखितपरीक्षायाम् | उत्तिर्णत्तार्थे गुणाः |
|---|---|---|
| 09 | 09 | 18 |

लेखित परिक्षायाः प्रारूपम्

प्रश्न-01 रिक्तस्थानानि पूरयत (कोऽपि दश) 10

- पञ्चदशप्रश्नाः प्रष्टव्या |
- प्रत्येकस्य समुचितमुत्तरस्य एक गुणः |

प्रश्न-02 अधोलिखित प्रश्नानां एक वाक्येन उत्तराणि लिखत | 08

- द्वादशप्रश्नाः प्रष्टव्या |
- प्रत्येकस्य समुचितमुत्तरस्य एक गुणः |

प्रश्न-03 अधोलिखिता काव्यपङ्क्तिं पूरयत | 12

- त्रि पङ्क्तयः प्रष्टव्या तेषु द्वे लेखनीया |
- प्रत्येकस्य समुच्चितमुत्तरस्य पञ्च गुणः |

# समय-विभाजनम्

| क्रम | पाठस्य नामानि | समयावधिः (होरात्मक) |
|---|---|---|
| 1 | सरस्वती वन्दना | 02 |
| 2 | वर्णपरिचयः | 04 |
| 3 | संख्यापठनम-1 | 04 |
| 4 | संख्यापठनम-2 | 04 |
| 5 | तुल्यास्यप्रयत्नं सवर्णम् | 06 |
| 6 | संस्कृतगीतम् | 02 |
| 7 | अत्राद्य | 05 |
| 8 | कालवाचकानि | 04 |
| 9 | समयशिक्षणम् | 04 |
| 10 | परिचयः | 05 |
| | समयावधिः (होरात्मिका) | 40 |

# 1 सरस्वती वन्दना

जय जय हे भगवति सुरभारति
तव चरणौ प्रणमामः ।
नादब्रह्ममयि जय वागीश्वरि
शरणं ते गच्छामः ॥

त्वमसि शरण्या त्रिभुवनधन्या
सुर-मुनि-वन्दित-चरणा ।
नवरसमधुरा कवितामुखरा
स्मित-रुचि-रुचिराभरणा ॥

आसीना भव मानसहंसे
कुन्द-तुहिन-शशि-धवले ।
हर जडतां कुरु बोधिविकासं
सित-पङ्कज-तनु-विमले ॥

ललितकलामयि ज्ञानविभामयि
वीणा-पुस्तक-धारिणी ।
मतिरास्तां नो तव पदकमले
अयि कुण्ठाविषहारिणि ॥

## स्वाध्यायकार्यम्

**प्रश्नः – १ योग्यविकल्पं चित्वा उत्तरं लिखत ।**

(१) अस्यां प्रार्थनायां कस्याः वन्दना विधीयते? (दुर्गायाः, वाग्देव्याः, भारतमातुः)

(२) सुरभारती केन युक्ता अस्ति? (नादब्रह्मणा, तालेन, स्वरेण)

(३) भगवत्याः हस्ते किं धृतं वर्तते? (खड्गं, शङ्खं, वीणा- पुस्तके)

(४) 'वागीश्वरी' इत्यत्र सन्धि-विच्छेदः अस्ति... (वाक्+ईश्वरी, वाग+ईश्वरी, वागी+श्वरी)

(५) देवी कुत्र असिना वर्तते? (आसन्दे, सिंहासने, मानसहंसे)

**प्रश्नः २ एकेन वाक्येन उत्तरं लिखत ।**

(१) का ललितकलामयि ?
(२) त्रिभुवनधन्याः के देव्याः वन्दनां कुर्वन्ति ?
(३) अस्मिन् पद्ये देव्याः कति संबोधनानि वर्तन्ते ?
(४) जडतां हृत्वा किं कर्तुं देव्यै प्रार्थनां क्रियते ?
(५) पदकमले किं भवतु ?

| 2 | # वर्णपरिचयः |
|---|---|

संस्कृतं पठनकाले आरम्भतः वर्णमालायाः पठनम् अनिवार्यं भवति । वर्णः भाषायाः सर्वेषु पदार्थेषु लघुत्तमः पदार्थः वर्तते । वर्णानां मेलनेन एव शब्दनिर्माणं भवति । संस्कृतभाषायां आहत्य ४६ वर्णाः विद्यन्ते । तेषु १३ स्वराः, ३३ व्यञ्जनानि च वर्तन्ते । वर्णानां खण्डः न भवति । वर्णानां प्रकारद्वयम् अस्ति । स्वरवर्णः व्यञ्जनवर्णः च ।

➢ स्वरवर्णः - स्वरवर्णानाम् उच्चारणे अन्य वर्णस्य आवश्यकता न भवति । स्वरवर्णानाम् अपि द्वौ भेदौ स्तः ।

क) सामान्यस्वरः - अ, आ, इ, ई, उ, ऊ, ऋ

ख) मिश्रितस्वरः - ए, ऐ, ओ, औ, ॠ, ऌ

2) व्यंजनवर्णः – स्वरवर्णानां साहाय्येन वर्णानाम् उचारणं शक्यं भवति ।

व्यञ्जनवर्णानां अपि विभागचतुष्टयं वर्तते ।

| **स्पर्श-वर्णः** | | **पञ्चमवर्णः** |
|---|---|---|
| कवर्गः | क् ख् ग् घ् | ङ् |
| चवर्गः | च् छ् ज् झ् | ञ् |
| टवर्गः | ट् ठ् ड् ढ् | ण् |
| तवर्गः | त् थ् द् ध् | न् |
| पवर्गः | प् फ् ब् भ् | म् |

**अन्तःस्थः** य् र् ल् व् **ऊष्मः** श् ष् स् ह्

अनुस्वारः (.) एवं विसर्ग (:) व्यंजनवर्णमालायां समाविष्टौ न स्तः तथापि वर्णइव कार्यं कुरुतः ।

**संयुक्तव्यंजनम्**

क्+ष् = क्ष् त्+र् = त्र् ज्+ञ् = ज्ञ्

एते त्रयोऽपि वर्णाः वर्णमालायाम् एव संनिहिताः सन्ति ।

यथा - कक्षः, छात्रः, यज्ञः इत्यादयः।

एवं प्रकारेण वयं संस्कृतस्य वर्णमाला विषये सम्यक् अभ्यासं कृत्वा शब्देषु वाक्येषु च प्रयोगं कर्तुं शक्नुमः ।

## <u>स्वाध्यायकार्यम्</u>

**प्रश्नः –१ योग्यविकल्पं चित्वा उत्तरं लिखत ।**

(६) संस्कृतभाषायां कति स्वराः सन्ति ? (०५, ३३, १३)

(७) निम्नेषु कः "ट-वर्गस्य" वर्णः ? (ढ्, ख्, ब्)

(८) "औ" कीदृशः स्वरः वर्तते ? (सामान्यस्वरः, मिश्रितस्वरः,मुक्तस्वरः)

(९) 'संस्कृतभाषायां आहत्य कति वर्णाः विद्यन्ते ? (३६,४६,५५)

(१०) व्यञ्जनानां कति विभागाः ? (पञ्च, त्रयः, चत्वारः)

प्रश्नः २ एकेन वाक्येन उत्तरं लिखत ।

(१) संयुक्तव्यञ्जने के वर्णाः भवन्ति ?

(२)"क-वर्गस्य" पञ्चमः वर्णः कः ?

(३) स्वरवर्णानां साहाय्येन केषाम् उचारणं शक्यं भवति

(४) अन्तस्थाः वर्णाः के ?

(५) केषां मेलनेन शब्दनिर्माणं भवति ?

# 3 संख्यापठनम्-1

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ | एकम् | ११ | एकादश | २१ | एकविंशतिः | ३१ | एकत्रिंशत् | ४१ | एकचत्वारिंशत् |
| २ | द्वे | १२ | द्वादश | २२ | द्वाविंशतिः | ३२ | द्वात्रिंशत् | ४२ | द्वाचत्वारिंशत् |
| ३ | त्रीणि | १३ | त्रयोदशः | २३ | त्रयोविंशतिः | ३३ | त्रयोत्रिंशत् | ४३ | त्रिचत्वारिंशत् |
| ४ | चत्वारि | १४ | चतुर्दशः | २४ | चतुर्विंशतिः | ३४ | चतुर्त्रिंशत् | ४४ | चतुष् चत्वारिंशत् |
| ५ | पञ्च | १५ | पञ्चदश | २५ | पञ्चविंशतिः | ३५ | पञ्चत्रिंशत् | ४५ | पञ्चचत्वारिंशत् |
| ६ | षट् | १६ | षोडश | २६ | षड्विंशतिः | ३६ | षड्त्रिंशत् | ४६ | षड् चत्वारिंशत् |
| ७ | सप्त | १७ | सप्तदश | २७ | सप्तविंशतिः | ३७ | सप्त त्रिंशत् | ४७ | सप्तचत्वारिंशत् |
| ८ | अष्ट | १८ | अष्टादश | २८ | अष्टाविंशतिः | ३८ | अष्ट त्रिंशत् | ४८ | अष्टचत्वारिंशत् |
| ९ | नव | १९ | नवदश | २९ | नवविंशतिः | ३९ | नव त्रिंशत् | ४९ | नवचत्वारिंशत् |
| १० | दश | २० | विंशतिः | ३० | त्रिंशत् | ४० | चत्वारिंशत् | ५० | पञ्चाशत् |

## स्वध्याय कार्यम्

प्रश्नः१. शब्देन संख्यां लिखित्वा रिक्त स्थानं पुरयन्तु.

(१) ०१ एकम्______

(२) १० ______

(३) २७ ______

(४) ३० ______

(५) ४४ ______

प्रश्नः२. अधोलिखित शब्दानाम् परिवर्तनम् अङ्केषु कुर्वन्तु ।

(१) द्वादश ______

(२) पञ्चाशत् ______

(३) अष्टादशः ______

(४) एकचत्वारिंशत् ______

(५) त्रिंशत् ______

# 4 संख्यापठनम्-2

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ५१ | एकपञ्चाशत् | ६१ | एकषष्ठी: | ७१ | एकसप्तति: | ८१ | एकाशीतिः | ९१ | एकनवतिः |
| ५२ | द्वापञ्चाशत् | ६२ | द्विषष्ठी: | ७२ | द्विसप्तति: | ८२ | द्व्यशीतिः | ९२ | द्विनवतिः |
| ५३ | त्रिपञ्चाशत् | ६३ | त्रिषष्ठी: | ७३ | त्रि सप्ततिः | ८३ | त्र्यशीतिः | ९३ | त्रिनवतिः |
| ५४ | चतु:पञ्चाशत् | ६४ | चतु:षष्ठी: | ७४ | चतुर्सप्तति: | ८४ | चतुरशीतिः | ९४ | चतुर्नवतिः |
| ५५ | पञ्चपञ्चाशत् | ६५ | पञ्चषष्ठी: | ७५ | पञ्चसप्तति: | ८५ | पञ्चाशीतिः | ९५ | पञ्चनवतिः |
| ५६ | षड्पञ्चाशत् | ६६ | षट्षष्ठी: | ७६ | षट्सप्तति: | ८६ | षडाशीति | ९६ | षण्णवतिः |
| ५७ | सप्तपञ्चाशत् | ६७ | सप्तषष्ठी: | ७७ | सप्तसप्तति: | ८७ | सप्providedाशीतिः | ९७ | सप्तनवतिः |
| ५८ | अष्टपञ्चाशत् | ६८ | अष्टषष्ठी: | ७८ | अष्ट सप्तति: | ८८ | अष्टाशीतिः | ९८ | अष्टानवतिः |
| ५९ | नवपञ्चाशत् | ६९ | नवषष्ठी: | ७९ | नव सप्तति: | ८९ | नवाशीतिः | ९९ | नवनवतिः |
| ६० | षष्ठी: | ७० | सप्तति: | ८० | अशीतिः | ९० | नवतिः | १०० | शतम् |

## स्वध्याय कार्यम

**प्रश्न:१. शब्देन संख्यां लिखित्वा रिक्त स्थानं पुरयन्तु.**

(१) ५१ <u>एकपञ्चाशत</u>

(२) ६९ ____________

(३) ८८ ____________

(४) ९९ ____________

(५) ८७ ____________

**प्रश्न:२. अधोलिखित शब्दानाम् परिवर्तनम् अङ्केषु कुर्वन्तु।**

(१) पञ्चाशीतिः ____________

(२) षड्पञ्चाशत् ____________

(३) सप्तषष्ठी: ____________

(४) नवतिः ____________

(५) अष्टानवतिः ____________

# 5 तुल्यास्यप्रयत्नं सवर्णम्

પ્રસ્તાવના – "वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिं ।

पाणिनिं सूत्रकारं च प्रणतोस्मि मुनित्रयम् ॥"

વૈદિક અને લૌકિક સંસ્કૃત ભાષાનાં વ્યાકરણશાસ્ત્રને સંપૂર્ણ અને સુદઢ રીતે ગઠન કરવામાં સૂત્રકાર પાણિનિ, વાર્તિકકાર કાત્યાયન અને ભાષ્યકાર પતંજલિ આ ત્રણ આચાર્યોનું મહત્વનું અને મુખ્ય પ્રદાન છે. આથી વ્યાકરણશાસ્ત્રને "त्रिमुनि व्याकरणशास्त्रम्" ત્રણ મુનિઓએ રચેલું વ્યાકરણશાસ્ત્ર કહે છે. તેમજ ભટ્ટોજી દીક્ષિતના શિષ્ય એવા વરદરાજાચાર્યએ પાણિનીયવ્યાકરણમાં પ્રવેશ માટે 'लघुसिद्धान्तकौमुदीम्' નામનો ગ્રન્થ લખેલો છે. તેમાં 'तुल्यास्य प्रयत्नं सवर्णम्' સૂત્રમાં અક્ષરોના ઉચ્ચારણ સ્થાનો તેમજ તેમના પ્રયત્નો વિષેની સમજ આપેલ છે. જેનો આપણે અહીં અભ્યાસ કરીશું.

---

➢ तुल्यास्य प्रयत्नं सवर्णम् १।१।९

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।

જે અક્ષરના ઉચ્ચારણમાં તાલુ વગેરે સ્થાન અને આભ્યંતર પ્રયત્ન આ બંને એકસરખાં જ હોય તેની પરસ્પર 'सवर्णम्' એવી સંજ્ઞા થાય છે.

- ➢ ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम् । 'ऋ' અને 'ऌ' બન્નેના ઉચ્ચારણસ્થાન જુદાં હોવા છતાં તે બન્નેની પરસ્પર 'सवर्णम्' એવી સંજ્ઞા થાય છે.
- ➢ अकुहविसर्जनीयानां कण्ठः । 'अ', 'कु' એટલે કે 'कवर्ग' = 'क्, ख्, ग्, घ्, ङ्', 'ह्' અને ':', વિસર્ગનાં ઉચ્ચારણનું સ્થાન કંઠ (ગળું) છે.
- ➢ इचुयशानां तालु । 'इ', 'चु' એટલે કે 'चवर्ग'= 'च्, छ्, ज्, झ्, ञ्', 'य्' અને श् નાં ઉચ્ચારણનું સ્થાન તાલુ (તાળવું) છે.
- ➢ ऋटुरषाणां मूर्धा । 'ऋ', 'टु' એટલે કે 'टवर्ग' = 'ट्, ठ्, ड्, ढ्, ण्' , 'र्', અને 'ष्' નાં ઉચ્ચારણનું સ્થાન મૂર્ધા (તાળવા પાસેના ખાડાનો ભાગ) છે.

- ऌतुलसानां दन्ताः । 'ऌ', 'तु' એટલે કે 'तवर्ग' = 'त्, थ्, द्, ध्, न्', 'ल्', અને 'स्' નાં ઉચ્ચારણનું સ્થાન દંત (દાંત) છે.
- उपूपध्मानीयानाम् ओष्ठौ । 'उ', 'पु' એટલે કે 'पवर्ग' = ' 'प्, फ्, ब्, भ्, म्', અને 'उपध्मानीयः' (≍प≍फ) નાં ઉચ્ચારણનું સ્થાન બન્ને ઓષ્ઠ (ઉપલો–નીચલો હોઠ) છે.
- ञमङणनानां नासिका च । 'ञ्, म्, ङ्, ण्, न्' આ પાંચ વ્યંજનો નાસિકામાંથી બોલાતા હોવાથી તેમનું સ્થાન 'નાસિકા' છે. અહીં જે 'च' આપ્યો છે, તે એટલા માટે કે આ પાંચેય વર્ગો ઉપર દર્શાવેલા પાંચ વર્ગોમાં આવી ગયેલ છે, તેથી તેમનાં 'કંઠ', 'તાલુ' વગેરે ઉપરોકત સ્થાનો તો છેજ પણ 'નાસિકા' પણ છે.
- एदैतोः कण्ठतालु । 'ए', અને 'ऐ' નું ઉચ્ચારણનું સ્થાન કંઠ અને તાળવું છે.
- ओदौतोः कण्ठोष्ठम् । 'ओ', અને 'औ' નું ઉચ્ચારણનું સ્થાન કંઠ અને ઓષ્ઠ (હોઠ) છે.
- वकारस्य दन्तोष्ठम् । 'व्' નું ઉચ્ચારણનું સ્થાન દંત (દાંત) અને ઓષ્ઠ (હોઠ) છે.
- जिह्वामूलीयस्य जिह्वामूलम् । જીભના મૂળ દ્વારા ઉચ્ચારણ થતા '≍क' અને '≍ख' નું ઉચ્ચારણનું સ્થાન 'જિહવામૂળ' (જીભનું મૂળ) છે. આ બંને અક્ષરોને **जिह्वामूलीयः** તરીકે ઓળખવામાં આવે છે.
- नासिका अनुस्वारस्य । અનુસ્વાર (કોઈ આખા અક્ષરની ઉપર કરવામાં આવતું મીંડું કે બિંદી) નું ઉચ્ચારણસ્થાન 'નાસિકા' છે.
- यत्नो द्विधा – आभ्यन्तरो बाह्यश्च । પ્રયત્ન (અક્ષરોના ઉચ્ચારનો વખતે થતો યત્ન) બે પ્રકારનો છે; (1) આભ્યંતર (2) બાહ્ય.
- आद्यः पञ्चधा –स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । તેમાં પહેલો 'આભ્યંતર' પ્રયત્ન પાંચ પ્રકારનો છે; તેના નામ (1) સ્પૃષ્ટ (2) ઈષત્સ્પૃષ્ટ (3) ઈષદ્વિવૃત (4) વિવૃત (5) સંવૃત.
- तत्र स्पृष्टं प्रयत्नं स्पर्शानाम् । તેમાં જે અક્ષરોની સંજ્ઞા 'સ્પર્શ' એવી હોય, તેમનો આભ્યંતર પ્રયત્ન (1) 'સ્પૃષ્ટ' છે.
- ईषत्स्पृष्टमन्तःस्थानाम् । જે અક્ષરોની સંજ્ઞા 'અંતઃસ્થ' એવી હોય, તેમનો આભ્યંતર પ્રયત્ન (2) 'ઈષત્સ્પૃષ્ટ' છે.
- ईषद्विवृतमूष्मणाम् । જે અક્ષરોની સંજ્ઞા 'ઊષ્મ' એવી હોય, તેમનો આભ્યંતર પ્રયત્ન (3) 'ઈષદ્વિવૃત' છે.
- विवृतं स्वराणाम् । જે અક્ષરોની સંજ્ઞા 'સ્વર' એવી હોય, તેમનો આભ્યંતર પ્રયત્ન (4) 'વિવૃત' છે.

➢ ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव । 'પ્રયોગની દશા' એટલે કે બોલતી વખતે હ્રસ્વ 'अ' નો આભ્યંતર પ્રયત્ન (5) સંવૃત છે. જ્યારે 'પ્રક્રિયાની દશા' અર્થાત રૂપસિદ્ધિ વગેરે વખતે તો બધા સ્વરોની જેમ તેનો આભ્યંતર પ્રયત્ન 'વિવૃત' જ થાય છે.

➢ बाह्यप्रयत्नस्त्वेकादशधा - विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । તેમાં બીજો 'બાહ્ય' પ્રયત્ન 11 પ્રકારનો છે; તેના નામ : (1) વિવાર (2) સંવાર (3) શ્વાસ (4) નાદ (5) ઘોષ (6) અઘોષ (7) અલ્પપ્રાણ (8) મહાપ્રાણ (9) ઉદાત્ત (10) અનુદાત્ત અને (11) સ્વરિત, આ પ્રમાણે (બાહ્યપ્રયત્નના) ભેદો છે.

➢ खरो विवाराः श्वासा अघोषाश्च । 'खर्' પ્રત્યાહારમાં આવતા અક્ષરો (ख्, फ्, छ्, ठ्, थ्, च्, ट्, त्, क्, प्, श्, ष्, स्) નો બાહ્ય પ્રયત્ન (1) વિવાર (3) શ્વાસ અને (6) અઘોષ છે.

➢ हशः संवारा नादा घोषाश्च । 'हश्' પ્રત્યાહારમાં આવતા અક્ષરોનો બાહ્ય પ્રયત્ન (2) સંવાર (4) નાદ અને (5) ઘોષ છે.

➢ वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः । 'कुचुटुतुपु' એ પાંચેય વર્ગોમાં આવતા પાંચ-પાંચ કુલ-25 અક્ષરો પૈકી પહેલા-ત્રીજા-પાંચમાં અક્ષરો અને 'यण्' પ્રત્યાહારમાં આવતા અક્ષરોનો બાહ્ય પ્રયત્ન (7) અલ્પપ્રાણ છે.

➢ वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । 'कुचुटुतुपु' એ પાંચેય વર્ગોમાં આવતા પાંચ-પાંચ કુલ-25 અક્ષરો પૈકી બીજા-ચોથા અક્ષરો અને 'शल्' પ્રત્યાહારમાં આવતા અક્ષરોનો બાહ્ય પ્રયત્ન (8) મહાપ્રાણ છે.

➢ कादयो मावसानाः स्पर्शाः । 'क्' થી 'म्' સુધીના અક્ષરો (क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म) 'સ્પર્શ' સંજ્ઞાવાળા છે.

➢ यणोऽन्तःस्थाः । यण् પ્રત્યાહારમાં આવતા અક્ષરો "અંતઃસ્થ' સંજ્ઞાવાળા છે.

➢ शल ऊष्माणः । शल् પ્રત્યાહારમાં આવતા અક્ષરો 'ઉષ્મ' સંજ્ઞાવાળા છે.

➢ अचः स्वराः । अच् પ્રત્યાહારમાં આવતા અક્ષરો 'સ્વર' સંજ્ઞાવાળા છે.

➢ ≍क≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः । ક અને ખ ની પહેલા મૂકવામાં આવતી ≍ આ નિશાનીને 'જિહ્વામૂલીયઃ' અર્ધવિસર્ગ (અડધો વિસર્ગ) કહેવામા આવે છે.

➢ ≍प≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः । પ અને ફ ની પહેલા મૂકવામાં આવતી ≍ આ નિશાનીને 'ઉપધ્માનીયઃ' અર્ધવિસર્ગ (અડધો વિસર્ગ) કહેવામા આવે છે.

➢ अं अः इत्यचः परावनुस्वारविसर्गौ ॥ વિસર્ગ (:) અને અનુસ્વાર હંમેશા સ્વરની ઉપર કે પાસે જ આવે છે, જેમ કે, 'अं' 'अः' ||

# वर्णानाम् उच्चारणस्थानानि

| | | |
|---|---|---|
| अकुहविसर्जनीयानां कण्ठः | अ, क्-वर्ग, ह् | कण्ठः |
| इचुयशानां तालु | इ, च्-वर्ग, य् , श् | तालु |
| ऋटुरषाणां मूर्धा | ऋ, ट्-वर्ग , र्, ष् | मूर्धा |
| लृतुलसानां दन्ताः | लृ, त्-वर्ग, ल्, स्, | दन्ताः |
| उपूपध्मानीयानाम् ओष्ठौ | उ, प्-वर्ग, उपध्मानीय | ओष्ठौ |
| ञमङणनानां नासिका च | ञ्, म्, ङ्, ण्, न् | नासिका (अपि) |
| एदैतोः कण्ठतालु | ए, ऐ | कण्ठतालु |
| ओदौतोः कण्ठोष्ठम् | ओ, औ | कण्ठोष्ठम् |
| वकारस्य दन्तोष्ठम् | व् | दन्तोष्ठम् |
| जिह्वामूलीयस्य जिह्वामूलम् | जिह्वामूलीय | जिह्वामूलम् |
| नासिका अनुस्वारस्य | अनुस्वार | नासिका |

## आभ्यन्तरप्रयत्नाः

| | |
|---|---|
| स्पर्शाः (= वर्गीयव्यञ्जनानि) | स्पृष्टम् |
| अन्तःस्थाः (= य्, व्, र्, ल्) | ईषत्स्पृष्टम् |
| स्वराः | विवृतम् |
| ऊष्माणः (= श्, ष्, स्, ह्) | ईषद्विवृतम् |
| ह्रस्व-अकारः प्रक्रियादशायाम् | संवृतम् |

<u>बाह्यप्रयत्नाः</u>

| | | |
|---|---|---|
| विवार-श्वास-अघोष | खर् | |
| संवार-नाद-घोष | हश् | |
| अल्पप्राण = 1, 3, 5, यण् | क् च् ट् त् प् | ग् ज् ड् द् ब्<br>ङ् ञ् ण् न् म्<br>य् र् ल् व् |
| महाप्राण = 2, 4, शल् | ख् छ् ठ् थ् फ्<br>श् ष् स् | घ् झ् ढ् ध् भ्<br>ह् |
| उदात्त / अनुदात्त / स्वरित | स्वराः | |

†आभ्यन्तरबाह्यप्रयत्नज्ञानार्थकं कोष्ठकम्—

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| आभ्यन्तर-प्रयत्नाः | स्पृष्टाः | | ईषत्स्पृष्टाः | | ईषद्विवृताः | विवृताः | | संवृताः |
| संज्ञाः | स्पर्शाः | | | अन्तःस्थाः | ऊष्माणः | | स्वराः | |
| वर्णाः | क ख<br>च छ<br>ट ठ<br>त थ<br>प फ | ग ङ<br>ज ञ<br>ड ण<br>द न<br>ब म | घ<br>झ<br>ढ<br>ध<br>भ | य<br>व<br>र<br>ल | श<br>ष<br>स | ह | अ इ उ<br>ऋ लृ ए<br>ओ ऐ औ | ह्रस्वोऽकारः प्रयोगे |
| बाह्यप्रयत्नाः | अ.प्रा.म.प्रा.<br>विवाराः<br>श्वासाः<br>अघोषाः | अल्पप्राणाः<br>संवाराः<br>नादाः<br>घोषाः | म.प्रा.<br>संवाराः<br>नादाः<br>घोषाः | अ.प्रा.<br>संवाराः<br>नादाः<br>घोषाः | म.प्रा.<br>विवाराः<br>श्वासाः<br>अघोषाः | म.<br>सं.<br>ना.<br>घो. | उदात्तानुदात्तस्वरिताः | |

# स्वाध्यायकार्यम्

## પ્રશ્ન:૧ ખાલી જગ્યા પૂરો.

૧. કવર્ગનું સ્થાન ......... છે.

૨. ચવર્ગનું સ્થાન ......... છે.

૩. આભ્યંતર પ્રયત્નના ........... પ્રકાર છે.

૪. બાહ્ય પ્રયત્નના .......... પ્રકાર છે.

૫. ........... નું ઉચ્ચારણનું સ્થાન દંત (દાંત) અને ઓષ્ઠ (હોઠ) છે.

૬. 'ए', અને 'ऐ' નું ઉચ્ચારણનું સ્થાન .............. છે.

૭. शल् પ્રત્યાહારમાં આવતા અક્ષરો .............. સંજ્ઞાવાળા છે.

## પ્રશ્ન:૨ એક વાક્યમાં જવાબ લખો.

૧. આભ્યંતર પયત્નના પ્રકારોના નામ લખો.

૨. સ્પર્શ વર્ણો કેટલા અને કયા કયા છે.

૩. વિસર્ગ (:) અને અનુસ્વાર હંમેશા કઈ જગ્યાએ આવે છે.

૪. પ્રયત્નના બે પ્રકારો લખો.

૫. 'બાહ્ય' પ્રયત્ન 11 પ્રકારનો છે; તેના નામ લખો.

૬. यण् પ્રત્યાહારમાં આવતા અક્ષરો કઈ સંજ્ઞાવાળા છે.

૭. 'ऋ' અને 'ऌ' બન્નેના ઉચ્ચારણસ્થાન જુદાં હોવા છતાં તે બન્નેની કઈ સંજ્ઞા થાય છે.

# 6 संस्कृतगीतम्

सादरं समीहतां वन्दना विधीयतां
श्रद्धया स्वमातृभू-समर्चना विधीयताम् ॥

आपदो भवन्तु वा, विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा
धीरता न हीयतां, वीरता विधीयतां
निर्भयेन चेतसा पदं पुरो निधीयताम् ॥ १॥

प्राणदायिनी इयं त्राणदायिनी इयं
शक्तिमुक्तिभक्तिदा सुधाप्रदायिनी इयं
एतदीयवन्दने सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम् ॥ २॥

- वासुदेव द्विवेदी शास्त्री

<u>स्वाध्याय कार्यम्</u>

प्रश्नः१. अधोलिखित प्रश्नानाम् उत्तराणि लिखतु ||

(१) आपदा शब्दस्य अर्थः कः ?
(२) हीयतां शब्दस्य अर्थःकः ?
(३) त्राणदायिनी शब्दस्य अर्थःकः ?
(४) प्रदीयताम् शब्दस्य अर्थःकः ?
(५) अस्य गीतस्य रचनाकारः कः ?

| 7 | अत्राद्य |
|---|---|

સનાતન સંસ્કૃતિમાં સંકલ્પનું મહત્વ છે. સંકલ્પ એટલે કાર્ય કરવાનો સમય અને કાર્ય પ્રત્યેની સમર્પણ નક્કી કરવા માટે સમયાવધિ દરમિયાન કાર્ય કરવાનું મહત્વ છે. સંકલ્પ કરવા માટે કેટલાક સમયોના એકમોને એકઠા કરવામાં આવે છે જેથી સમયના કોઈ એક દિવસને નક્કી કરી શકાય. દિવસ નક્કી કરવા માટે આ પાઠમાં આપણે માસ, પક્ષ, તિથિ અને વારના સંસ્કૃત નામોનો પરિચય મેળવીશું.

## अथ सङ्कल्पः

ॐ अत्राद्य महामङ्गल्य प्रद मासोत्तमे मासे शुभ कारिके ______(1)______ मासे, ______(2)______ पक्षे, ______(3) तिथौ, ______(4)______ वासरे अध्ययन कर्मम्-अहं करिष्ये।

આ સંકલ્પમાં ખાલી જગ્યાઓમાં એક અંક દર્શાવવામાં આવેલ છે, જેનો તે ક્રમના કોઠામાંથી સંસ્કૃત નામને બોલી સંકલ્પ કરવો..

<u>કોષ્ટક-02 (માસ કોષ્ટક)</u>

| ક્રમ | ગુજરાતીમાં માસના નામ | સંસ્કૃતમાં માસના નામ | ક્રમ | ગુજરાતીમાં માસના નામ | સંસ્કૃતમાં માસના નામ |
|---|---|---|---|---|---|
| 1 | કારતક | कार्तिक | 7 | વૈશાખ | वैशाख |
| 2 | માગશર | मृगशीर्ष | 8 | જેઠ | ज्येष्ठ |
| 3 | પોષ | पोष | 9 | અષાઢ | आषाढ |
| 4 | મહા | माघ | 10 | શ્રાવણ | श्रावण |
| 5 | ફાગણ | फाल्गुन | 11 | ભાદરવો | भाद्रपद |
| 6 | ચૈત્ર | चैत्र | 12 | આસો | आश्विन |

## કોષ્ટક–02 (પક્ષ કોષ્ટક)

| ક્રમ | ગુજરાતી પક્ષ | સંસ્કૃતમાં પક્ષ |
|---|---|---|
| 1 | સુદ, અજવાળીયું | शुक्लपक्षे |
| 2 | વદ, અંધારિયું | कृष्णपक्षे |

## કોષ્ટક–03 (તિથિ કોષ્ટક)

| ક્રમ | ગુજરાતીમાં તિથિના નામ | સંસ્કૃતમાં તિથિના નામ | ક્રમ | ગુજરાતીમાં તિથિના નામ | સંસ્કૃતમાં તિથિના નામ |
|---|---|---|---|---|---|
| 1 | એકમ, પડવો | प्रतिपदायां | 9 | નોમ | नवम्यां |
| 2 | બીજ | द्वितीयायां | 10 | દશમ | दशम्यां |
| 3 | ત્રીજ | तृतीयायां | 11 | અગીયારસ | एकादश्यां |
| 4 | ચોથ | चतुर्थ्यां | 12 | બારસ | द्वादश्यां |
| 5 | પાંચમ | पञ्चम्यां | 13 | તેરસ | त्रयोदश्यां |
| 6 | છઠ | षष्ठ्यां | 14 | ચૌદશ | चतुर्दश्यां |
| 7 | સાતમ | सप्तम्यां | 15 | પૂનમ | पूर्णिमायां |
| 8 | આઠમ | अष्टम्यां | 16 | અમાસ | अमावास्यायां |

નોંધ- દરેક તિથિઓ વિભક્તિ પ્રત્યય "યાં" સાથે લખેલ છે.

કોષ્ટક–04 (વાર કોષ્ટક)

| ક્રમ | ગુજરાતીમાં વારના નામ | સંસ્કૃતમાં વારના નામ |
|---|---|---|
| 1 | સોમવાર | चन्द्रवासरे |
| 2 | મંગળવાર | भौमवासरे |
| 3 | બુધવાર | बुधवासरे, सोम्यवासरे |
| 4 | ગુરુવાર | बृहस्पतिवासरे |
| 5 | શુક્રવાર | भृगुवासरे, शुक्रवासरे |
| 6 | શનિવાર | शनिवासरे, मन्दवासरे |
| 7 | રવિવાર | भानुवासरे, सूर्यवासरे |

<u>स्वाध्यायकार्यम्</u> - प्रतिदिवसे आवर्तनप्राक् संकल्पस्य प्रयोगं कृत्वा अध्ययनस्य प्रारम्भः कर्तव्यः |

| ८ | काल वाचकानि |
|---|---|

छात्र-०१ अद्य गुरुवासरः | तर्हि श्वः कः वासरः ?

छात्र-०२ शुक्रवासरः

छात्र-०१ अद्य गुरुवासरः | तर्हि ह्यः कः वासरः ?

छात्र-०२ बुधवासरः

छात्र-०१ ह्यः गुरुवासरः | तर्हि अद्य कः वासरः ?

छात्र-०२ शुक्रवासरः

छात्र-०१ श्वः सूर्यवासरः | तर्हि अद्य कः वासरः ?

छात्र-०२ शनिवासरः




| | |
|---|---|
| ह्यः | रविवासरः |
| **अद्य** | **सोमवासरः** |
| श्वः | मङ्गलवासरः |





**स्वाध्याय कार्यः**

**प्रश्नः१. अधोलिखित प्रश्नानाम् उत्तराणि लिखतु ।**

(१) अद्य बुधवासरः ह्यः कः वासरः?
(२) श्वः मङ्गलवासरः परश्वः कः वासरः?
(३) ह्यः शनिवासरः तर्हि अद्य कः वासरः?
(४) श्वः सोमवासरः तर्हि अद्य कः वासरः ?
(५) ह्यः गुरुवासरः श्वः कः वासरः?

# 9 समय शिक्षणम्

| | |
|---|---|
|  | छात्र-१: कति वादनो जाता?<br>छात्र-2: दशवादनो जाता \| |
| छात्र-१: कति वादनो जाता?<br>छात्र-2: सप्तवादनो जाता \| |  |
|  | छात्र-१: कति वादनो जाता?<br>छात्र-2: सपादः नववादनो जाता \| |

| | |
|---|---|
| छात्र-१: क: समय: ?<br>छात्र-2: सपाद: पञ्चवादनो जाता \| |  |
|  | छात्र-१: क: समय: ?<br>छात्र-2: सार्ध नववादनो जाता \| |
| छात्र-१: क: समय: ?<br>छात्र-2: पादोन द्वादशवादनो जाता \| |  |
|  | छात्र-१: क: समय: ?<br>छात्र-2: पादोन एकादशवादनो जाता \| |

# स्वाध्याय कार्यम्

प्रश्नः१. शब्देन लिखित्वा रिक्तस्थानं पूरयतु ।

(१) ०६.०० = ________

(२) ०४.४५ = ________

(३) ११.३० = ________

(४) १०.१५ = ________

(५) ०७.३० = ________

(६) १२.४५ = ________

(७) ०२.३० = ________

(८) ०७.१५ = ________

# 10 परिचय:

रमेश: -भवत: नाम किम् ?

राम: -मम नाम राम: |

रमेश: -भवत: पितु: नाम किम् ?

राम: -मम पितु: नाम दशरथ: |

रमेश: -भवत: मातु: नाम किम् ?

राम: -मम मातु: नाम कौशल्या |

रमेश: -भवत: भ्रातु: नाम किम् ?

राम: -मम भ्रातु: नाम लक्ष्मण: |

रमेश: -भवान् कुत्र पठति ?

राम: -अहं वाल्मीकि आश्रमे पठामि |

---

जया -भवत्या: नाम किम्?

हीना -मम नाम हीना |

जया -भवत्या:पितु: नाम किम् ?

हीना -मम पितु: नाम ईश्वरचन्द्र: |

जया -भवत्या: मातुः नाम किम् ?

हीना -मम मातु: नाम इन्दिरा |

जया -भवती कुत्र पठति ?

हीना -अहं संस्कृत-महाविद्यालये पठामि |

# स्वाध्यायकार्यम्

प्रश्नः१. अधोलिखित प्रश्नानां उत्तरं ददत ।

(१) भवतः/ भवत्याः मातुः नाम किम् ?

(२) भवतः पितुः नामः ?

(३) भवान् /भवती कुत्र पठति ?

(४) भवान् कस्यां कक्षायां पतति ?

(५) भवान् कस्मिन् महाविद्यालये पठति?

(६) भवान् कस्मिन् ग्रामे निवसति ?

गुजरात माध्यमिक एवं उच्चतर माध्यमिक शिक्षण बोर्ड, गान्धिनगरम्

सेतु –पाठ्यक्रमः (ब्रिज-कोर्ष)

अभ्यासक्रमसंरचना – २०२३

कक्षा – उत्तरमध्यमा (कक्षा - ११)

लेखकाः
डॉ.रघुभाई डी. जोषी
डॉ.पुनित वी. शीलु
डॉ.रविशंकर के. राजगोर
श्री योगेशकुमार डी. जोषी

अनुक्रमणिका


| क्रमः | पाठनाम | पृष्ठक्रमाङ्कः | |
|---|---|---|---|
| १ | सरस्वतीवन्दना | | |
| २ | संस्कृतगीतम् | | |
| ३ | परिचयः | | |

| | | | |
|---|---|---|---|
| ४ | सङ्ख्या | | |
| ५ | सुभाषितानि | | |
| ६ | शब्दरूपज्ञानम् | | |
| ७ | क्रियापदानि | | |
| ८ | सन्धिप्रयोगाः | | |
| ९ | पञ्चाङ्गपरिचयः | | |
| १० | नित्यकर्माणि | | |

गुजरात माध्यमिक एवं उच्चतर माध्यमिक शिक्षण बोर्ड, गान्धिनगरम्

सेतु –पाठ्यक्रमः (ब्रिज-कोर्ष)

अभ्यासक्रमसंरचना – २०२३

कक्षा – उत्तरमध्यमा (कक्षा - ११)

| क्रमः | पाठनाम | पाठनसमयः | |
|---|---|---|---|
| १ | सरस्वतीवन्दना | २ – घण्टा | |
| २ | संस्कृतगीतम् | २ – घण्टा | |
| ३ | परिचयः | २ – घण्टा | |
| ४ | सङ्ख्या | २ – घण्टा | |
| ५ | सुभाषितानि | ३ – घण्टा | |
| ६ | शब्दरूपज्ञानम् | ५ – घण्टा | |
| ७ | क्रियापदानि | ७- घण्टा | |
| ८ | सन्धिप्रयोगाः | १० – घण्टा | |
| ९ | पञ्चाङ्गपरिचयः | ३ – घण्टा | |
| १० | नित्यकर्माणि | ४ – घण्टा | |
| आहत्यसमयः | | ४०- घण्टाः | |

# परिचयः

मम नाम आकाशः ।

भवतः नाम किम् ?

मम जनकस्य नाम अजयः।

भवतः जनकस्य नाम किम् ?

मम मातुः नाम शारदा ।

भवतः मातुः नाम किम् ?

मम भ्रातुः नाम जितेन्द्रः ।

भवतः भ्रातुः नाम किम् ?

मम भगिन्याः नाम जया ।

भवतः भगिन्याः नाम किम् ?

मम नगरस्य नाम गान्धिनगरम्

भवतः नगरस्य नाम किम् ?

मम विद्यालयस्य नाम श्री नारायण संस्कृत महाविद्यालयः ।

भवतः विद्यालयस्य नाम किम् ?

अहं मध्यमा कक्ष्यायां पठामि ।

भवान् कस्यां कक्ष्यायां पठति ?

# स्वाध्यायः

प्रश्नः – १  भवतः परिचयं लिखत |

प्रश्नः – २ भवतः मित्रस्य परिचयं लिखत |

## गुजरात माध्यमिक एवं उच्चतर माध्यमिक शिक्षण बोर्ड, गान्धिनगरम्

### सेतु –पाठ्यक्रमः (ब्रिज-कोर्ष)

### लिखितप्रश्नपत्रस्य प्रारूपं गुणभारश्च

### कक्षा – उत्तरमध्यमा (कक्षा - ११) गुणाः – ५०

| | |
|---|---|
| प्रश्नः – १ वैकल्पिकप्रश्नाः । | १५ |
| (पञ्चदश प्रश्नाः पृष्टव्याः) | |
| प्रश्नः – २ एकेन वाक्येन पञ्चदशानामुत्तराणि लिखत। | १५ |
| (सप्तदश प्रश्नाः पृष्टव्याः) | |
| प्रश्नः – ३ सन्धिविच्छेदं कुरुत। | ०५ |
| (सप्तसु पञ्च ) | |
| प्रश्नः – ४ सन्धिं कुरुत। | ०५ |
| (सप्तसु पञ्च ) | |
| प्रश्नः – ४ उदाहरणानुसारं सङ्ख्यां लिखत। | ०५ |
| (सप्तसु पञ्च ) | |
| प्रश्नः – ५ स्व-परिचयं लिखत। | ०५ |

# सङ्ख्या

| | | | | |
|---|---|---|---|---|
| १ एकम् | ११ एकादश | २१ एकविंशतिः | ३१ एकत्रिंशत् | ४१ एकचत्वारिंशत् |
| २ द्वे | १२ द्वादश | २२ द्वाविंशतिः | ३२ द्वात्रिंशत् | ४२ द्विचत्वारिंशत् |
| ३ त्रीणि | १३ त्रयोदश | २३ त्रयोविंशतिः | ३३ त्रयस्त्रिंशत् | ४३ त्रिचत्वारिंशत् |
| ४ चत्वारि | १४ चतुर्दश | २४ चतुर्विंशतिः | ३४ चतुस्त्रिंशत् | ४४ चतुश्चत्वारिंशत् |
| ५ पञ्च | १५ पञ्चदश | २५ पञ्चविंशतिः | ३५ पञ्चत्रिंशत् | ४५ पञ्चचत्वारिंशत् |
| ६ षट् | १६ षोडश | २६ षड् विंशतिः | ३६ षट् त्रिंशत् | ४६ षट्चत्वारिंशत् |
| ७ सप्त | १७ सप्तदश | २७ सप्तविंशतिः | ३७ सप्तत्रिंशत् | ४७ सप्तचत्वारिंशत् |
| ८ अष्टौ | १८ अष्टादश | २८ अष्टाविंशतिः | ३८ अष्टात्रिंशत् | ४८ अष्टचत्वारिंशत् |
| ९ नव | १९ नवदश | २९ नवविंशतिः | ३९ नवत्रिंशत् | ४९ नवचत्वारिंशत् |
| १०दश | २० विंशतिः | ३० त्रिंशत् | ४० चत्वारिंशत् | ५० पञ्चाशत् |

| | | | | |
|---|---|---|---|---|
| ५१ एकपञ्चाशत् | ६१ एकषष्ठिः | ७१ एकसप्ततिः | ८१ एकाशीतिः | ९१ एकनवतिः |
| ५२ | ६२ द्विषष्ठिः | ७२ | ८२ द्व्यशीतिः | ९२ द्वि-नवतिः |

| | | | | |
|---|---|---|---|---|
| द्विपञ्चाशत् | | द्विसप्ततिः | | |
| ५३ त्रिपञ्चाशत् | ६३ त्रिषष्ठिः | ७३ त्रिसप्ततिः | ८३ त्र्यशीतिः | ९३ त्रिनवतिः |
| ५४ चतुर्पञ्चाशत् | ६४ चतुः षष्ठिः | ७४ चतुःसप्ततिः | ८४ चतुरशीतिः | ९४ चतुर्णवतिः |
| ५५ पञ्चपञ्चाशत् | ६५ पञ्चषष्ठिः | ७५ पञ्चसप्ततिः | ८५ पञ्चाशीतिः | ९५ पञ्चनवतिः |
| ५६ षड्पञ्चाशत् | ६६ षट्षष्ठिः | ७६ षट्सप्ततिः | ८६ षडशीतिः | ९६ षण्णवतिः |
| ५७ सप्तपञ्चाशत् | ६७ सप्तषष्ठिः | ७७ सप्तसप्ततिः | ८७ सप्ताशीतिः | ९७ सप्तनवतिः |
| ५८ अष्टपञ्चाशत् | ६८ अष्टषष्ठिः | ७८ अष्टसप्ततिः | ८८ अष्टाशीतिः | ९८ अष्टनवतिः |
| ५९ नवपञ्चाशत् | ६९ नवषष्ठिः | ७९ नवसप्ततिः | ८९ नवाशीतिः | ९९ नवनवतिः |
| ६० षष्ठिः | ७० सप्ततिः | ८० अशीतिः | ९० नवतिः | १०० शतम् |

## सङ्ख्यागणना

एकं दशं शतं चैव सहस्रमयुतं तथा ।

लक्षं च नियुतं चैव कोटिरर्बुदमेव च ॥

वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः ।

अन्त्यं मध्यं परार्धश्च दशवृध्या यथा क्रमम् ॥

एकम् १

| | |
|---|---|
| दश | १० |
| शतम् | १०० |
| सहस्रम् | १,००० |
| अयुतम् | १०,००० |
| लक्षम् | १,००,००० |
| नियुतम् | १०,००,००० |
| कोटिः | १,००,००,००० |
| अर्बुदम् | १०,००,००,००० |
| वृन्दम् | १,००,००,००,००० |
| खर्वः | १०,००,००,००,००० |
| निखर्वः | १,००,००,००,००,००० |
| शङ्खः | १०,००,००,००,००,००० |
| पद्मः | १,००,००,००,००,००,००० |
| सागरः | १०,००,००,००,००,००,००० |
| अन्त्यम् | १,००,००,००,००,००,००,००० |
| मध्यम् | १०,००,००,००,००,००,००,००० |
| परार्धम् | १,००,००,००,००,००,००,००,००० |

## स्वाध्यायः

प्रश्नः १ उदाहरणानुसारं लिखत ।

उ.दा - अष्टात्रिंशत् - ३८

(१) नवचत्वारिंशत् -

(२) नवाशीतिः

(३) पञ्चाशत् -

(४) अशीतिः-

(५) षोडश-

(६) शतम्-

प्रश्नः -२ उदाहरणानुसारं लिखत ।

उ.दा - १२ - द्वादश

(१) १५ -

(२) २२ –

(३) ३४ -

(४) ५२-

(५) ५८ -

(६) ८४ -

# सुभाषितानि

जानाति विविधा भाषा जानाति विविधाः कलाः ।
आत्मानं नैव जानाति यो न जानाति संस्कृतम् ।।

अयं निजः परोवेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैवकुटुम्बकम् ॥

नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः ।
शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन ॥

न चोरहार्यम् न च राजहार्यम्,
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धते एव नित्यं,
विद्याधनं सर्वधनप्रधानम् ॥

अद्भिर्गात्राणि शुध्यन्ति मंनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥५॥

## स्वाध्यायः

प्रश्नः - १ योग्यविकल्पं चित्वा उत्तरं लिखत ।

१) न चोरहार्यं किं ? ( सुवर्णम् , विद्याधनम्, भ्रातृधनम्)

२) अद्भिः किं शुद्ध्यति? ( बुद्धिः ,विद्या, गात्राणि)

३) व्यये कृते सति किं वर्धते ?( गृहम् , विद्याधनम् , निजधनम्)

४) अयं निजः परो वेति गणना ______________। ( गुरुचेतसाम्, अचेतसाम् , लघुचेतसाम् )

५) मनः केन शुद्ध्यति?( जलेन , सत्येन , ज्ञानेन )

प्रश्नः २ एकेन वाक्येन उत्तरं लिखत ।

१) आत्मानं ज्ञातुं कस्याः भाषायाः ज्ञानम् आवश्यकम् ?

२) उदारचरितानां भावना कीदृशी?

३) के नमन्ति ?

४) ज्ञानेन किं शुद्ध्यति?

५) किं सर्वधनप्रधानम् ?

## पञ्चाङ्ग–परिचय:

वेदाङ्गानम् अर्थ-ज्ञानाय वेदेषु प्रतिपादितस्य कर्म-काण्डस्य यथार्थ ज्ञानाय वेदाङ्गानां महत्वं विद्यते । शिक्षया वैदिक-मन्त्राणां स्वरादिज्ञानं,कल्पशास्त्रेण यज्ञ-विधीनां बोध:, व्याकरणेन शब्दस्वरूपज्ञानं, निरुक्तेन पदानाम् अर्थ-दृष्ट्या निर्वचनं-ज्ञानं, छन्दसा मन्त्राणां छन्दोज्ञानं, ज्योतिष-वेदाङ्गेन यज्ञाय समुचित-मुहूर्तज्ञानं च भवति । अत: एतानि वेदपुरुषस्य अङ्गानि मन्यन्ते । उक्तं च

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥**

काल-ज्ञानं ज्योतिष-शास्त्रेण एव भवति । ज्योतिषशास्त्रस्य काल-विवेचनात्मक-स्वरूपं पञ्चाङ्गमस्ति । पञ्चाङ्गस्य पञ्च अङ्गानि सन्ति । यथा १.तिथि:, २.वार:, ३.नक्षत्रम्, ४.योग:, ५.करणं चेति । उक्तम् अपि-

**तिथिर्वारनक्षत्रे योग: करणमेव च ।**

**इति पञ्चाङ्गमख्यातं व्रतपर्वनिदर्शकम् ॥**

**का नाम तिथि: ?**

भ्रमण-वशात् यदा सूर्य-चन्द्रयो: अन्तरं द्वादशांश-तुल्यं भवति तदा एका तिथि: भवति । वस्तुत: तिथि: एकं चान्द्रं दिनं भवति । मासे शुक्ल-पक्ष:, कृष्ण-पक्ष: चेति द्वौ पक्षौ भवत: । प्रत्येकं पक्षे १५ तिथय: भवन्ति । तिथिनां नामानि यथा –

प्रतिपदा,द्वितीया,तृतीया,चतुर्थी,पञ्चमी,षष्ठी,सप्तमी,अष्टमी,नवमी,दशमी, एकादशी,द्वादशी,त्रयोदशी,चचतुर्दशी,पूर्णिमा,अमावस्या च ।

तिथिनां नन्दादी-संज्ञा: इथ्यं भवन्ति –

| संज्ञा | तिथयः | | |
|---|---|---|---|
| नन्दा | १ | ६ | ११ |
| भद्रा | २ | ७ | १२ |
| जया | ३ | ८ | १३ |
| रिक्ता | ४ | ९ | १४ |
| पूर्णा | ५ | १० | १५ |

**कः वासरः ?**

एकस्मात् सूर्योदयात् अपर-सूंर्योदय-पर्यन्तक: काल: एकं सावनं दिनमुच्यते | लोके सावनदिन मेव वारः अथवा वासरः शब्देन परिचीयते | सप्त वाराः भवन्ति | तेषां नामानि यथा-

| क्रमः | वासरनामानि |
|---|---|
| १ | रविवासरः/भानुवासरः |
| २ | सोमवासरः/चन्द्रवासरः |
| ३ | भौमवासरः/मङ्गलवासरः |
| ४ | बुधवासरः/सौम्यवासरः |
| ५ | बृहस्पतिवासरः/गुरुवासरः |
| ६ | भृगुवासरः/शुक्रवासरः |
| ७ | मन्दवासरः/शनिवासरः |

दिनारंभे प्रथम-होराया अधिपततिः ग्रहः एव दीनाधिपतिः भवति | तस्य एव नाम्रा तत्-तद्-वासरस्य नाम निर्धारितःवर्तते | रविवासरस्य प्रथमहोराया अधिपतिः सूर्यः |अतः तस्य दिनस्य नाम रविवासरः इति जातम् | आकाशे ग्रहाणां कक्षा-क्रमः एव होरा-निर्धारणस्य आधारः अस्ति |

## ३. किं नाम नक्षत्रम् ?

आकाशे वर्तमानतारकाणां समूहः नक्षत्रम् इति उच्यते । राशि-मण्डलस्य तुल्यः द्वादशविभागाः क्रियन्ते । ते एव द्वादश राशयः इति उच्यन्ते । अस्य राशि-मण्डलस्य एव तुल्याः सप्तविंशतिः विभागाः सप्तविंशतिः नक्षत्राणि इति उच्यन्ते । एतेषु सप्तविंशतिविभागेषु प्रतिविभागं यावन्तः तारकाः आयान्ति तेषां समूहः एव नक्षत्रम् इति उच्यते । एतेषां तारकाणां रेखाभिः योजनेन या आकृतिः उत्पद्यते तदनुसारेण तस्य तस्य नक्षत्रस्य नाम आचार्यैः निर्धारितम् । नक्षत्राणां नामानि इत्थं सन्ति-

**अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः ।**
**आर्द्रा पुनर्वसु पुष्यस्तथाश्लेषा मघा ततः ॥**
**पूर्वाफाल्गुनिकाचैव उत्तराफाल्गुनी ततः ।**
**हस्तचित्रा तथा स्वाती विशाखा तदनन्तरम् ॥**
**अनुराधा ततो ज्येष्ठा ततो मूलं निगद्यते ।**
**पूर्वाषढोत्तराषाढा त्वभिच्छ्रवणा तथा ॥**
**घनिष्ठा शततारा‌ख्यं पूर्वभाद्रपदं ततः ।**
**उत्तराभाद्रपदं चैव रेवत्येतानि भानि च ॥**

१. अश्विनी, २. भरणी, ३. कृत्तिका , ४. रोहिणी, ५. मृगशिरा, ६. आर्द्रा, ७.पुनर्वसु, ८. पुष्य, ९. आश्लेषा, १०. मघा, ११. पूर्वाफाल्गुनी, १२. उत्तराफाल्गुनी, १३. हस्त, १४. चित्रा, १५. स्वाती, १६. विशाखा, १७. अनुराधा, १८, ज्येष्ठा, १९. मूल, २०. पूर्वाषाढ, २१. उत्तराषाढ़, २२. श्रवणा, २३. धनिष्ठा, २४. शतभिषा, २५. पूर्वाभाद्रपद, २६. उत्तराभाद्रपद, २७. रेवती च ।

## ४.कः नाम योगः ?

**सूर्य-चन्द्रयोः गति-योगः एव योगः इति उच्यते । योगाः पिण्डाकाराः न**

भवन्ति, अर्थात् एतेषाम् आकृतयः न भवन्ति | अनयोः गति-योगेन २७ योगाः उत्पद्यन्ते | योगानां नामानि यथा -

विष्कुंभ : प्रीतिरायुष्मान् सोभाग्य : शौभनत्तथा ।

अतिगण्ड : सुकर्मा च धृति : शूलस्तथैव च ॥

गंडो वृद्धिर्ध्रुवश्चाथ व्याघातो हर्षणस्तथा ।

वज्रं सिद्धिर्व्यतीपातो वरीयान् परिघ: शिव: ॥

सिद्धि : साध्य : शुभ : शुक्लो ब्रह्ना चैंद्रोऽथ वैधृति : ।

योगानां ज्ञेयमेतेपां स्वनामसद्दशं फलम् ॥

५. किं नाम करणम् ?

तिथ्यर्धं करणम् इति उच्यते | तन्नाम तिथेः अर्धः भागः करणम् इति उच्यते | इत्थं एकस्यां तिथौ द्वे करणे भवतः | अतः एकस्मिन् मासे ६० करणानि भवन्ति | करणानि द्विविधानि भवन्ति- चरकरणम्,स्थिरकरणम् च | करणानां नामानि यथा-

| | | | |
|---|---|---|---|
| १.बवः | २.बालवः | ३.कौलवः | ४.तैतिलः |
| ५.गरः | ६.वणिजः | ७.विष्टि: | ८. भद्रा |

स्थिरकरणानि यथा-

| | | | |
|---|---|---|---|
| १.शकुनिः | २.चतुष्पद् | ३.नागः | ४.किस्तुघ्न: |

## स्वाध्यायः

**प्रश्नः-1 योग्यं विकल्पं चित्वा उत्तराणि यच्छत।**

(1)वेदपुरुषस्य मुखं किमस्ति?(छन्दः,कल्पः,व्याकरणम्)

(2)ज्योतिषशास्त्रं वेदपुरुषस्य किं स्थानमस्ति? (मुखम्,चक्षुः,श्रोतम्)

(3)कति वासराः सन्ति?(८,६,७)

(4)कति स्थिरकरणानि सन्ति?(५,८,४)

(5)पिण्डाकाराः के न भवन्ति ?(योगाः,वासराः,तिथयः)

**प्रश्नः-2 एकेन वाक्येन उत्तरं लिखत |**

(1) कति वेदाङ्गानि ?

(2) पञ्चाङ्गानि लिखत ।

(3) कति तिथयः?

(4) भौमवासरस्य द्वितीयं नाम किम्?

(5) किन्नाम नक्षत्रम्?

# संस्कृतगीतम्

(सुन्दरसुरभाषा)

मुनिवरविकसित कविवरविलसित

मञ्जुलमञ्जूषा, सुन्दरसुरभाषा ।

अयि मातस्तव पोषणक्षमता

मम वचनातीता, सुन्दरसुरभाषा ॥ ॥मुनिवर॥

वेदव्यास-वाल्मीकि-मुनीनाम्

कालिदास-बाणादिकवीनाम् ।

पौराणिक-सामान्य-जनानाम्

जीवनस्य आशा, सुन्दरसुरभाषा ॥१॥ ॥मुनिवर॥

श्रुतिसुखनिनदे सकलप्रमोदे

स्मृतिहि[illegible] सरसविनोदे ।

[illegible] क-काव्यविशारदे

तव संस्[illegible]तिरेषा, सुन्दरसुरभाषा ॥२॥ ॥मुनिवर॥

नवरस-रुचिरालङ्कृति-धारा

वेदवि[illegible] वेदान्त-विचारा ।

वैद्य-व्यो[illegible]-शास्त्रादि-विहारा

[illegible] ां, सुन्दरसुरभाषा ॥३॥ ॥मुनिवर॥

## सन्धिप्रयोगाः

सन्धिज्ञानेन विना संस्कृतक्षेत्रे अध्ययनं दुष्करमेव । संस्कृतक्षेत्रे गद्ये पद्ये वा पदच्छेदं विना अर्थज्ञानं नैव भवति । पदच्छेदसन्धिज्ञानमूलः ।

वर्णानामतिशयितः सन्निधिः सन्धिः । द्वयोः वर्णयोः मध्ये व्यवधानरहितमुच्चारणमेव सन्धिः । ते च सन्धयः पञ्चधा १.अच् (स्वर) सन्धिः २. प्रकृतिभावः ३. हल् (व्यञ्जन) सन्धिः ४.विसर्गसन्धिः ५.स्वादिसन्धिश्च । लघुसिद्धान्तकौमुद्यां प्रकृतिभावः स्वरसन्धौ स्वादिसन्धिश्च विसर्गसन्धौ दृश्यते ।

### अच् (स्वर) सन्धिः ।

**अच्-सन्धयः मुख्य-अष्टधा ।**

(१) यण्-सन्धिः (२) अयादिसन्धिः

(३) गुणसन्धिः (४) वृद्धिसन्धिः

(५) दीर्घसन्धिः (६) पूर्वरुपसन्धिः

(७) पररुपसन्धिः (८) प्रकृतिभावसन्धिः

❖ **यण्-सन्धिः (इको यणचि) ।**

- इक् (इ,उ,ऋ,लृ) प्रत्यहारस्य स्थाने यण् (य,व,र,ल) प्रत्यहारस्य वर्णाः भवन्ति अचि परे ।

हि + एकः = ह्येकः । (इ = य्)

यदि+ अपि = यद्यपि । (इ = य्)

खलु + अपि = खल्वपि । ( उ = व्)

पितृ+ अंशः = पित्रंशः । (ऋ = र्)

लृ + आकृतिः = लाकृतिः । (लृ =ल्)

❖ **अयादिसन्धिः (एचोऽयवायावः) ।**

- एचः (ए, ओ, ऐ, औ) स्थाने क्रमात् अय्, अव्, आय्, आव् एते स्युः अचि परे ।

हरे + ए = हरये (ए = अय्) ।

गुरो + ए = गुरवे (ओ = अव्) ।

नै + अक = नायकः (ऐ = आय्) ।

करौ + एतौ = करावेतौ (औ = आव्) ।

❖ **(वान्तोयि प्रत्यये) ।**

- यकारादौ प्रत्यये परे ओकार-औकारयोः स्थाने क्रमेण अव्, आव्, एतौ आदेशौ भवतः ।

गो + यम् = गव्यम् (ओ = अव्)

नौ + यम् = नाव्यम् (औ = आव्)

❖ **गुणसन्धिः (आद् गुणः) ।**

- अवर्णात् अचि परे पूर्वपरयोः स्थाने गुण-एकादशो भवति । (ह्रस्व अकारः तथा ए, ओ
  एतेषां त्रयाणां वर्णानां गुणसंज्ञा भवति ।)

रमा + ईश्वरः = रमेश्वरः (अ + ई = ए)

सूर्य + उदयः = सूर्योदयः (अ + उ = ओ)

वित्त + उपार्जनः = वित्तोपार्जनः (अ + उ = ओ)

सप्त + ऋषयः = सप्तर्षयः (अ + ऋ = अर्)

❖ **वृद्धिसन्धिः (वृद्धिरेचि) ।**

- अवर्णात् एचि परे पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति । (आ, ऐ, औ एतेषां त्रयाणां

वर्णानां वृद्धिसंज्ञा भवति ।)

अद्य + एव = अद्यैव (अ + ए = ऐ)

तव + ऐश्वर्यम् = तवैश्वर्यम् (अ + ऐ = ऐ)

तण्डुल + ओदनम् = तण्डुलौदनम् (अ + ओ = औ)

दिव्य + औषधम् = दिव्यौषधम् (अ + औ = औ)

❖ **(उपासर्गादृति धातौ) ।**

- अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशो भवति ।

प्र + ऋच्छति = प्रार्च्छति (अ + ऋ = आर्)

उप + ऋच्छति = उपार्च्छति (अ + ऋ = आर्)

❖ **सवर्णदीर्घन्धिः (अकः सवर्णेदीर्घः) ।**

- अक्-प्रत्याहारात् सवर्णे अचि परे पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति ।

दैत्य + अरिः = दैत्यारिः (अ + अ = आ)

मुनि + ईन्द्रः = मुनीन्द्रः ( इ + ई = ई)

भानु + उदयः = भानूदयः ( उ + उ = ऊ)

होतृ + ऋकारः = होतृकारः (ऋ + ऋ = अर्)

❖ **पूर्वरूपसन्धिः ( एङः पदान्तादति ) ।**

- पदान्तात् एङ्-प्रत्याहारात् ह्रस्वे अकारे परे पूर्वरुपमेकादेशो भवति ।

अन्ते +अपि = अन्तेऽपि (ए + अ = ए)

गुरो + अव = गुरोऽव (ओ + अ = ओ)

महेशो + अपठत् = महेशोऽपठत् (ओ + अ = ओ)

❖ **पररुपसन्धिः (एङि पररुपम्) ।**

- अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पररुपमेकादेशो भवति ।

प्र + एजते = प्रेजते (अ + ए = ए)

उप + ओषति = उपोषति (अ +ओ = ओ)

❖ **प्रकृतिभावः (प्लुतप्रगृह्याचि नित्यम्) ।**

- स्वभावेन अवस्थितिः प्रकृतिभावः । यथा इ ईन्द्रः इत्यत्र दीर्घ प्राप्ते किन्तु प्रकृतिभावात्

दीर्घ न प्रवर्तते ।

(प्लुताः प्रगृह्यश्च अच् प्रत्याहारे परे नित्यं प्रकृत्या स्युः।)

आगच्छ कृष्ण + अत्र गौश्चरति = आगच्छ कृष्ण अत्र गौश्चरति ।

(अत्र प्लुतादेशात् प्रकृतिभावः)

❖ **ईदूदेद् द्विवचनं प्रगृह्यम् ।**

- द्विवचनान्त इकारस्य उकारस्य एकारस्य च प्रगृह्यसंज्ञा भवति।

हरी + एतौ = हरी एतौ (यण् न भवति)

विष्णू + इमौ = विष्णू इमौ (यण् न भवति)

गङ्गे + अमू = गङ्गे अमू (अयादेशः न भवति)

❖ **निपात एकाजनाङ् ।**

- आङ् इति विहाय कश्चिदपि एकाच्निपातः तस्य प्रगृह्यसंज्ञा भवति ।

इ + ईन्द्रः = इ ईन्द्रः

उ + उमेशः = उ उमेशः

❖ (ओत्) ।

• प्लुतभिन्न-निपातसंज्ञकस्य ओकारस्य प्रगृह्यसंज्ञा भवति ।

अहो + ईशा: = अहो ईशा

अहो + अत्रभवान् = अहो अत्रभवान्

❖ (सम्बुद्धौ शाकल्यस्येतावनार्षे) ।

• ह्रस्वे इकारे परे अवैदिकस्य सम्बोधनस्य ओकारस्य विकल्पेन प्रगृह्यसंज्ञा भवति ।

भानो + इति = भानो इति । / भानविति ।

विष्णो + इति = विष्णो इति । / विष्णविति ।

❖ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ।

• पान्तस्य इक्-वर्णस्य असवर्णे अचि परे विकल्पेन ह्रस्वो भवति ।

चक्री + अत्र = चक्रि अत्र /चक्र्यत्र ।

❖ (ऋत्यकः) ।

• पदान्त अक् वर्णात् ह्रस्वेऋकारे परे विकल्पेन ह्रस्वः भवति ।

राजा + ऋषि = राज ऋषि (ह्रस्व:) राजर्षिः (गुणसन्धिः)

ब्रह्मा + ऋषि = ब्रह्म ऋषिः । ब्रह्मर्षिः ।

❖ (अदसो मात्) ।

• अदस्-शब्दस्य अकारात् परे ईकास्य ऊकारस्य च प्रगृह्यसंज्ञा भवति ।

अमी + ईशा = अमी ईश ।

रामकृष्णावमू + आसाते = रामकृष्णावमू आसाते ।

## हल्सन्धिः

### ❖ श्चुत्वसन्धिः (स्तोः श्चुना श्चुः ) ।

- सकारतवर्गः एवं शकारचवर्गः तयोः योगे शकारचवर्गः भवति ।

विष्णुस् + शेते = विष्णुश्शेते । (स + श् = श्श)

रामस् + चिनोति = रामश्चिनोति । (स् + च् = श्च)

मनस् + चञ्चलः = मनश्चञ्चलः। (स् + च = श्च)

रामस् + छात्रः = रामश्छात्रः । (स् + छ = श्छ)

सत् +चित् = सच्चित् । (त् + च = च्च)

### ❖ ष्टुत्वसन्धिः (ष्टुना ष्टुः ) ।

- सकारतवर्ग-षकारटवर्गाभ्यां योगे सकारस्य स्थाने षकारः तथा तवर्गस्य स्थाने क्रमात् टवर्गः भवति ।

रामस् + षष्ठः = रामष्षष्ठः। (स् + ष् = ष्ष)

देवस् + षष्ठः = देवष्षठः । (स् + ष् = ष्ष)

रामस् + टीकते = रामष्टीकते । (स् + ट् = ष्ट)

पेष् + ता = पेष्टा । (ष् + त् = ष्ट)

### ❖ जश्त्वसन्धिः (झलां जशोऽन्ते ) ।

- पदान्तस्य झल्-प्रत्याहारस्य स्थाने जश्-प्रत्याहारस्य वर्णाः भवन्ति । अर्थात् वर्गतृतीयाक्षरो भवति ।

(१) वाक् + ईशः = वागीशः ।

(२) वाक् + हरिः = वाग्हरिः ।

(३) लभ् + धा = लब्धा ।

❖ **चर्त्वसन्धिः ( खरि च )।**

- खर्-प्रत्याहारे परे सति झल्-प्रत्याहारस्य स्थाने चर्-प्रत्याहारस्य वर्णाः भवन्ति। अर्थात् वर्गप्रथमाक्षरो भवति।

(१) सम्पद् + कुमारः = सम्पत्कुमारः।

(२) विराड् + पुरुषः = विराट्पुरुषः।

(३) सहृद् + क्रीडति = सहृत्क्रीडति।

❖ **अनुनासिकसन्धिः (यरोऽनुनासिकेऽनुनासिको वा )।**

- पदान्तव्यञ्जनेषु परेषु पदान्ते स्थितानां वर्गीयव्यञ्जनानां स्थाने तत्तद्वर्गीयः पञ्चमः वर्णः

विकल्पेन भवति। प्रत्यये परे नित्यमेव (पञ्चमाक्षरः) भवति।

(१) तत् + मे = तन्मे।

(२) षड् + मासाः = षण्मासाः।

(३) तत् + न = तन्न।

(४) तत् + नयति = तन्नयति।

❖ **अनुस्वारसन्धिः (मोऽनुस्वारः)।**

- व्यञ्जनं परे स्यात् तदा पूर्वस्थितस्य सविभक्तिवचनस्य 'म्' इत्यस्य अनुस्वारो भवति।

(१) कृष्णम् + वन्दे = कृष्णं वन्दे।

(२) सत्यम् + वद = सत्यं वद।

(३) कार्यम् + कुरु = कार्यं कुरु।

❖ **नश्चापदान्तस्य झलि ।**

- अन्त:स्थानुनासिकान् विहाय अन्यत् व्यञ्जनं परे स्यात् तदा पूर्वस्थितस्य

अविभक्तिवचनयो: 'न्, म्' इत्यनयो: स्थाने अनुस्वारो भवति ।

(१) यशाम् + सि= यशांसि ।

(२) आक्रम् + स्यते = आकंस्यते ।

❖ **अनुस्वारस्य ययि परसवर्णः ।**

- अनुस्वारानन्तरं यो वर्ण: स यद्वर्गीय: अनुस्वारस्य स्थाने तद्वर्गस्यान्तिमः वर्णः भवति ।

(१) मुं + चति = मुञ्चति । (२) मुं + डनम् = मुण्डनम् ।

❖ **तोर्लिः ।**

- तवर्गात् लकारे परे तवर्गाक्षरस्थाने लकारो भवति । अनुनासिकाक्षरस्य स्थाने

अनुनासिकलकार: भवति ।

(१) तद् + लय: =तल्लय:

(२) कुशान् + लाति = कुशाँल्लाति

❖ **'ङमुट्' (ङमो ह्रस्वादचि ङमुण्नित्यम् ) ।**

- ह्रस्वस्वरानन्तरं य: ङकार: य: णकार: य: नकार: च तस्मात् स्वर: स्यात् तदा पूर्वं

क्रमश: ङ्, ण्, न् इति भवति ।

(१) प्रत्यङ् + आत्मा = प्रत्यङ्ङात्मा ।

(२) सुगण् + ईश: = सुगण्णीशः ।

### ❖ पूर्वसवर्णः (झयो होऽन्यतरस्याम् ) ।

- प्रायः तत्तद्वर्गीयतृतीयव्यञ्जनात् परस्य हकारस्य स्थाने तत्तद्वर्गीयं चतुर्थं व्यञ्जनं

विकल्पेन भवति ।

(१) वाग्/क् + हरि: = वाग्घरिः ।

(२) तद्/ त् + हितम् = तद्धितम् ।

### ❖ अनियमितसन्धयः( उदः स्थास्तम्भोः पूर्वस्य ) ।

- 'उत्' उपसर्गात् परस्य 'स्था' धातोः 'स्तम्भ' धातोश्च आदौ स्थितस्य सकारस्य स्थाने

थकारादेशो भवति ।

(१) उत् + स्थानम् = उत्थ्थानम् । उत्थानम् ।

(२) उत् + स्थातव्यम् = उत्थ्थातव्यम् । उत्थातव्यम् ।

### ❖ छत्वसन्धिः (शश्छोऽटि ) ।

- पदान्त झय् प्रत्याहारात् परे स्थितस्य शकारस्य स्थाने विकल्पेन छकारः स्थाने, यदि

अट्प्रत्याहारस्य वर्णः परेभवति तदा एव ।

(१) तत् + शिवः = तच्छिवः ।

(२) तत् + शास्त्रम् = तच्छास्त्रम् ।

(३) मृत् + शकटिकम् = मृच्छकटिकम् ।

❖ (छेच) ।

- ह्रस्वस्वरात् परस्तात् छकार: भवति तदा पूर्वस्थितस्वरान्तरम् तुगागमो भवति ।

शिव + छाया = शिवच्छाया ।

लक्ष्मी + छाया = लक्ष्मीच्छाया/लक्ष्मीछाया ।

## विसर्गसन्धिः

- **विसर्गस्य स्थाने सकारः (विसर्जनीयस्य सः ) खरि परे विसर्गस्य स्थाने सकारः भवति,**

**श्, ष्, स् इत्येतेषु परेषु तु विकल्पेन ।**

(१) बाल: + तत्र = बालस्तत्र ।

(२) कृष्ण: + छात्र: = कृष्णश्छात्र: ।

(३) हरि: + शेते = हरिश्शेते/हरि: शेते।

(४) पय: + शीतलम् = पयश्शीतलम् / पय: शीतलम् ।

(५) राम: + षष्ठ: = रामष्षष्ठ: / राम: षष्ठ: ।

❖ **विसर्गस्य स्थाने रेफादेशः**

- **इच: परस्य विसर्गस्य स्थाने रेफः भवति, अशि परे ।**

**अव्ययस्यापि 'र्' (रेफः) भवति ।**

(१) कविः + इति = कविरिति ।

(२) मुनिः + अवदत् = मुनिरवदत् ।

(३) पितुः + इच्छा = पितुरिच्छा।

**(हश् प्रत्यहारे परे रेफ उपरिभागे गच्छति)**

(१) कविः + हरति = कविर्हरति ।

(२) भानुः + गच्छति = भानुर्गच्छति ।

(३) वायुः + वाति = वायुर्वाति ।

❖ **विसर्गस्य स्थाने उकारः (हशि च )**

- **प्लुतभिन्नः अकारात् परे रु स्थाने उकारादेशः भवति हश प्रत्याहारे परे ।**

(१) शिवस् + वन्द्यः (शिव + उ + वन्द्य) = शिवो वन्द्यः ।

(२) छात्रस् + हसति (छात्र + उ + हसति) = छात्रो हसति ।

(३) बालः + वसति = बालो वसति ।

(४) बालः + वदति = बालो वदति ।

❖ **(अतोरोरप्लुतादप्लुते )**

- **प्लुतभिन्नः अकारात् परे रु-स्थाने उकारादेशः भवति अत् परे ।**

(१) शिवः + अर्च्यः = शिवोऽर्च्यः ।

(२) महेशः + अस्ति = महेशोऽस्ति ।

(३) उपस्थितः + अस्मि = उपस्थितोऽस्मि ।

❖ **विसर्गलोपः- ( भोभगोअघोअपूर्वस्य योऽशि )**

- **आकारात् परस्य विसर्गस्य स्थाने यकारो भवति ( यकार॰ ा लोपो ॰ ॰ति )**

  **'अश्'**

**प्रत्याहारवर्णाः परे स्युः तदा ।**

(१) छात्राः + अत्र =छात्रा अत्र ।

(२) नटाः + गच्छन्ति = नटा गच्छन्ति ।

(३) भक्ताः + नमन्ति = भक्ता नमन्ति ।

- **अकारात् परस्य विसर्गस्य अकारं वर्जयित्वा अचि (स्वरे ) परे लो ॰ ॰ति**

  **।**

(१) सुतः + आगच्छति = सुत आगच्छति ।

(२) कुतः + = कुत आगतः ।

(३) चन्द्रः + उदेति = चन्द्र उदेति ।

(४) कः + एषः क एषः ।

- **स्वरात् परस्य रेफस्य लोपः पूर्वस्वरस्य दीर्घश्च भवति ।**

(१) हरिः + रम्यः = हरिर् + रम्यः = हरी रम्यः ।

(२) निः + रसः = निर् + रसः = नीरसः ।

(३) पुनर् + रमते = पुना रमते ।

- **'एषः' 'सः' इत्यनयोः विसर्गस्य लोपो भवति हलि परे ।**

(१) सः + गच्छति = स गच्छति ।

(२) एषः + गच्छति = एष गच्छति ।

# स्वाध्याय:

प्रश्नः – १ अधोलिखितानां पदानां सन्धिं कुरुत।

(१) मधु + अरिः
(२) नौ+ अकः
(३) मम + एव
(४) हरिस् +शेते
(५) कार्यम् + कुरु
(६) सम्पद् + कुमारः
(७) बालः + वदति
(८) छात्राः + अत्र

प्रश्नः – २ अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत।

(१) हिमालयः
(२) हरये
(३) सूर्योदयः
(४) रामश्चिनोति
(५) लब्धा
(६) शिवच्छाया
(७) वायुर्वाति
(८) चन्द्र उदेति

## शब्दरूपज्ञानम्

भाषायाः ज्ञानाय शब्दानां ज्ञानम् आवश्यकं भवति। संस्कृतभाषायां शब्दः द्विधा विभक्तः लौकिकः वैदिकश्च। पाणिनीयव्याकरणे शब्दानां षड्लिङ्गेषु विभाजनं कृत्वा सिद्धिः प्रदर्शिता वर्तते । षड्निलिल्ङ्गानि यथा- अजन्त पुँल्लिङ्गम्,अजन्तस्त्रील्लिङ्गम्,अजन्तनपुंसकल्लिङ्गम् तथा हलन्तपुँल्लिङ्गम्, हलन्तस्त्रील्लिङ्गम्,हलन्तनपुंसकल्लिङ्गम्। अत्र पञ्चशब्दानां रूपाणि पठ्यते ।

---

शब्दाना सिद्धये एकविंशतिसुबन्तप्रत्ययानां ज्ञानम् आवश्यकम् । ते च यथा -

सु औ जस् प्रथमा । अम् औट् शस् द्वितीया। टा भ्यां भिस् तृतीया। ङे भ्यां भ्यस् चतुर्थी । ङसि भ्यां भ्यस् पञ्चमी । ङस् ओस् आम् षष्ठी । ङि ओस् सुप् सप्तमी। एतैः प्रत्ययैः प्रातिपदिकशब्दानां सिद्धिः भवति । शब्दरूपाणि यथा-

### अकारान्तः पुँल्लिङ्गो रामशब्दः ।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | रामः | रामौ | रामाः |
| **द्वितीया** | रामम् | रामौ | रामान् |
| **तृतीया** | रामेण | रामाभ्याम् | रामैः |
| **चतुर्थी** | रामाय | रामाभ्याम् | रामेभ्यः |
| **पञ्चमी** | रामात्/रामाद् | रामाभ्याम् | रामेभ्यः |
| **षष्ठी** | रामस्य | रामयोः | रामाणाम् |
| **सप्तमी** | रामे | रामयोः | रामेषु |
| **सम्बोधनम्** | हे राम | हे रामौ | हे रामाः |

एवमेव श्याम,देव,दत्तादायः शब्दाः ज्ञेयाः ।

## आकारान्तः स्त्रीलिङ्गो रमाशब्दः ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पञ्चमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधनम् | हे रमे | हे रमे | हे रमाः |

एवमेव गीता,राधा,सीतादयः शब्दाः ज्ञेयाः ।

## अकारान्तः नपुँसकलिङ्गो ज्ञानशब्दः ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ज्ञानम् | ज्ञाने | ज्ञानानि |
| द्वितीया | ज्ञानम् | ज्ञाने | ज्ञानानि |
| तृतीया | ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| चतुर्थी | ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| पञ्चमी | ज्ञानात् / ज्ञानाद् | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| षष्ठी | ज्ञानस्य | ज्ञानयोः | ज्ञानाणाम् |
| सप्तमी | ज्ञाने | ज्ञानयोः | ज्ञानेषु |
| सम्बोधनम् | हे ज्ञान | हे ज्ञाने | हे ज्ञानानि |

एवमेव धन,वन,फ़लादयः शब्दाः ज्ञेयाः ।

**त्रिषु लिङ्गेषु समानः दकारान्तः सर्वनामसंज्ञकः युष्मद् शब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | त्वम् | युवाम् | यूयम् |
| **द्वितीया** | त्वाम् / त्वा | युवाम् / वाम् | युष्मान् / वः |
| **तृतीया** | त्वया | युवाभ्याम् | युष्माभिः |
| **चतुर्थी** | तुभ्यम् / ते | युवाभ्याम् / वाम् | युष्मभ्यम् / वः |
| **पञ्चमी** | त्वत् | युवाभ्याम् | युष्मत् |
| **षष्ठी** | तव / ते | युवयोः / वाम् | युष्माकम् / वः |
| **सप्तमी** | त्वयि | युवयोः | युष्मासु |

**त्रिषु लिङ्गेषु समानः दकारान्तः सर्वनामसंज्ञकः अस्मद् शब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | अहम् | आवाम् | वयम् |
| **द्वितीया** | माम् / मा | आवाम् / नौ | अस्मान् / नः |
| **तृतीया** | मया | आवाभ्याम् | अस्माभिः |
| **चतुर्थी** | मह्यम् / मे | आवाभ्याम् / नौ | अस्मभ्यम् / नः |
| **पञ्चमी** | मत् | आवाभ्याम् | अस्मत् |
| **षष्ठी** | मम / मे | आवयोः / नौ | अस्माकम् / नः |
| **सप्तमी** | मयि | आवयोः | अस्मासु |

छात्रप्रवृत्तिः - अनेन प्रकारेण इकरन्तोकरन्ताः विविधाः न्यूनातिन्यून चत्वारिंशत् शब्दाः कण्ठस्थीकरणीयाः ।

## स्वाध्यायः

प्रश्नः १ योग्यविकल्पं चित्वा उत्तरं ददातु ।

१ कति सुबन्तप्रत्ययाः सन्ति ?

१ )१८ २)९ ३) २१ ४)१५

२ रामैः रूपं भवति ।

१ )तृतीया २)चतुर्थी ३)द्वितीया ४)प्रथमा

३ अस्मद् शब्दः कीदृशः ?

१ ) पुँल्लिङ्गम् २) स्त्रीलिङ्गम् ३) नपुंसकल्लिङ्गम् ४)सर्वनामसंज्ञकः

४ ज्ञानशब्दस्य द्वितीया एकवचनं किम् ?

१ ) ज्ञानम् २) ज्ञानात् ३) ज्ञानस्य ४) ज्ञानेन

५ न्युनातिन्यून कति शब्दाः कण्ठस्थीकरणीयाः ?

१ )१८ २)९ ३) ४० ४)१५

प्रश्नः २ अधोलिखितप्रश्नानाम् एकवाक्येन उत्तराणि लिखतु ।

१ रामशब्दस्य षष्ठीविभक्तिं लिखत.

२ रमाशब्दस्य द्वितीया एकवचनं किम् ?

३ ज्ञानशब्दस्य लिङ्गं लिखत.

४ अस्मद्शब्दस्य प्रथमैकवचने किं रूपं भवति ।

५ युष्मद्शब्दस्य पञ्चमी बहुवचनं लिखत.

## क्रियापदानि

पाणिनीयव्याकरणं धातुपाठः गणपाठः सूत्रपाठः उणादयः लिङ्गानुशासनाम् इति पञ्चाङ्गं व्याकरणमस्ति। तत्र क्रियापदम् अर्थात् धातुः। महामुनिपाणिनिना धात्वोपदेशः कृतोऽस्ति।

दधातिशब्द रुपं यः सः धातुः। उक्तं हि पाणिनिना भूवादयो धातवः। भू प्रभृतयः वा सदृशाः धातवः सन्ति। ते च धातवः परस्मैपद आत्मनेपदेति द्विधाविभक्ताः सन्ति। तयोः अत्र सामान्यधातुरुपाणि प्रदीयन्ते। क्रियापदनिर्माणं अष्टादश तिङन्तप्रत्ययैः भवति। यथा -

तिप् तस् झि ,सिप् थस् थ ,मिप् वस् मस् परस्मैपदप्रत्ययाः।

त आतां झ,थासां ध्वम् , इट् वहि महिङ् आत्मनेपदप्रत्ययाः।

धातौ दश लकाराः लट् लिट् लुट् लृट् लेट्लोट् लङ् लिङ् लुङ् लृङ् भवन्ति।

एधवृद्धौ धातोः वर्तमाने लट्लकारः। भ्वादिगणः। सेट् धातुः।

| एकवचनम् | द्विवचनम् | वहुवचनम् |
|---|---|---|
| एधते | एधेते | एधन्ते |
| एधसे | एधेथे | एधध्वे |
| एधे | एधावहे | एधामहे |

एधवृद्धौ धातोः लोट् च लोट्लकारः।

| | | |
|---|---|---|
| एधताम् | एधेताम् | एधन्ताम् |
| एधस्व | एधेथाम् | एधध्वम् |
| एधै | एधावहै | एधामहै |

एधवृद्धौ धातोः अनद्यतने लङ्लकारः।

| | | |
|---|---|---|
| ऐधत | ऐधेताम् | ऐधन्त |
| ऐधथाः | ऐधेथाम् | ऐधध्वम् |
| ऐधे | ऐधावहि | ऐधामहि |

एधवृद्धौ धातोः विधिलिङ्लकारः।

| | | |
|---|---|---|
| एधेत | एधेयाताम् | एधेरन् |
| एधेथाः | एधेयाथाम् | एधेध्वम् |
| एधेयः | एधेवहि | एधेमहि |

### भूसत्तायां धातोः वर्तमाने लट्लकारः। भ्वादिगणः। सेट् धातु

| | | |
|---|---|---|
| भवति | भवतः | भवन्ति |
| भवसि | भवथः | भवथ |
| भवामि | भवावः | भवामः |

### भूसत्तायां धातोः लोट् च लोट्लकारः।

| | | |
|---|---|---|
| भवतु, भवतात् | भवताम् | भवन्तु |
| भव, भवतात् | भवतम् | भवत |
| भवानि | भवाव | भवाम |

### भूसत्तायां धातोः अनद्यतने लङ्लकारः।

| | | |
|---|---|---|
| अभवत् | अभवताम् | अभवन् |
| अभवः | अभवतम् | अभवत |
| अभवम् | अभवाव | अभवाम |

### भूसत्तायां धातोः विधिलिङ्लकारः।

| | | |
|---|---|---|
| भवेत् | भवेताम् | भवेयुः |
| भवेः | भवेतम् | भवेत |
| भवेयम् | भवेव | भवेम |

### कर्तरीकर्मवाच्यभाववाच्येषु प्रथमपुरुषैकवनस्य रुपाणि–

| | | |
|---|---|---|
| धातुः – कर्तरि /कर्मणि | धातुः – कर्तरि /कर्मणि | धातुः – कर्तरि /कर्मणि |
| अट् – अटति/ अट्यते | आप् –आप्नोति/आप्यते | कृष् – कृषति /कृष्यते |
| अद् – अत्ति/अद्यते | आस् –आस्ते/ आस्यते | क्री – करोति/ क्रीयते |
| अर्च – अर्चति/अच्यर्ते | इङ् – अधीते/अधीयते | क्रीड् – क्रीडति /क्रीड्यते |

अर्ज - अर्जयति/अजर्यते

धातुः - रुपम्

अर्ह - अर्हति/अर्ह्यते
अव् - अवति/अव्यते
अश् - अश्नाति/अश्यते
अस् - असति/अस्यते
अस् - अस्ति/भूयते
खन् -खनति/ खन्यते
खाद् -खादति/ खाद्यते
खेल् -खेलति/ खेल्यते
गण् -गणयति/ गण्यते
गम् -गच्छति/गम्यते
गै -गायति/ गीयते
ग्रन्थ् -ग्रन्थति/ ग्रथ्यते
ग्रह् - गृहणाति/गृह्यते
घ्रा - जिघ्रति/घ्रायते
चर् - चरति/चर्यते
चल् - चलति/चल्यते
चि - चिनोति/चीयते
चिन्त् -चिन्तयति/ चिन्त्यते
चुर् -चोरयति/ चार्यते

इष् - इष्यति/इष्यते

धातुः - रुपम्

उज्झ -उज्झति/ प्रोज्झयते
कथ् -कथयति/कथ्यते
कम्प् -कम्पते/ कम्प्यते
कुप् - कुप्यति/ कुप्यते
कृ -करोति/ क्रियते
जृ - जीर्यति/जीर्यते
जीव् -जीवति/ जीव्यते
जागृ - जागर्यते
ज्वल् - ज्वलति/ज्वल्यते
डीङ् - डीयते/डीयते
तड् -ताडयति/ ताड्यते
तन् - तनोति/तन्यते
तर्क -तर्कयति/ तर्क्यते
त्यज् - त्यजति/त्यज्यते
तुष् -तुष्यति/ तुष्यते
त्रस् - त्रसयति/त्रस्यते
त्वर् -त्वरते/ त्वर्यते
दा -ददति/ दीयते
दह् -दहति / दह्यते

क्रुध् -क्रुध्यति/ क्रुध्यते

धातुः - रुपम्

क्लिश् - क्लिश्यते
क्षम् - क्षमते/क्षम्यते
क्षल् -क्षालयति/ क्षाल्यते
क्षिप् -क्षिप्यति/ क्षिप्यते
क्षि - क्षयति/क्षीयते
दुह् -दोग्धि/ दुह्यते
ध्मा - धमति/ध्मायते
ध्यै -ध्यायति/ ध्यायते
धा -दधाति/ धीयते
धाव् - धाव्यते
धृ - धरति/ध्रियते
नम् - नमति/ नम्यते
नश् -नश्यति/ नश्यते
नी -नयति/ नीयते
नृत् -नृत्यति/ नृत्यते
पच् - पचति/पच्यते
पा - पिबति/पीयते
पठ् -पठति/ पठ्यते
पत् -पतति/ पत्यते

छात्रप्रवृत्तिः - अनेन प्रकारेण दशगणस्थाः न्यूनातिन्यून विंशतिधातवः कण्ठस्थीकरणीयाः ।

## स्वाध्यायः

प्रश्नः १ योग्यविकल्पं चित्वा उत्तरं ददातु ।

१ कति तिङन्तप्रत्ययाः सन्ति ।

१ )१८ २)९ ३) ४ ४)१५

२ एधधातोः किमर्थः ?

१ )सत्ता २)गतिः ३) वृद्धिः ४)पठनम्

३ वर्तमाने कः लकारः भवति ?

१ )लिङ् २)लुट् ३) लिट् ४)लट्

४ भूधातोः लुटि प्रथमपुरुषैकवचने किं रूपं भवति ?

१ )भवसि २)भवानि ३) भवतु ४)भव

५ कृधातोः कर्मणि किं रूपं भवति ?

१ )पठ्यते २)क्रियते ३) लिख्यते ४)गीयते

प्रश्नः २ अधोलिखितप्रश्नानाम् एकवाक्येन उत्तराणि लिखतु ।

१ परस्मैपदप्रत्ययाः लिखन्तु ।

२ भूधातोः लट्लकारं लिखतु ।

३ पञ्चधातूनां कर्तरि कर्मणि रूपाणि लिखन्तु ।

४ एधधातोः लिङ्लकारं लिखतु ।

५ तिङ्प्रत्ययाः लिखन्तु ।

# नित्यकर्माणि

वेदप्रणीतकर्माणि कूर्वन् इह शतं जीवेत् । तानि च नित्यनैमित्तिककाम्यादिनी। तत्र प्रतिदिन क्रियमाणानि कर्माणि नित्यकर्माणि । द्विजैः नित्यकर्माण्यवश्यमेव करणीयानि। यतो हि अकरणे प्रत्यवायभाक् भवति । अतः अस्मिन् प्रकरणे नित्यकर्मणां परिचयं प्राप्स्यामः ।

---

संध्या स्नानं जपश्चैव देवतानां च पूजनम् ।

वैश्वदेवं तथाऽतिथ्यं षट्कर्माणि दिने दिने ।।

मनुष्यैः स्नानं,संध्या,जपः, देवपूजनम्,वैश्वदेवः, तथा अतिथिसत्कारः एतानि षट् कर्माणि प्रतिदिनं कर्तव्यानि ।

स्नानम्-

ब्रह्ममूहुर्ते प्रातरुत्थाय करवन्दनां कृत्वा शौचादिकं समाप्य स्नानागारे तीर्थे तडागे वा ससंकल्पपुरस्सरं तीर्थानामावाहनपूर्वकं गङ्गादि नदीनां स्मरणपूर्वकं प्रतिदिनं स्नानं कुर्यात् ।

संध्या-

सम्यक् ध्यायते अनया इति संध्या। धर्मशास्त्रे प्रातः,मध्याह्नः,सायमिति त्रिधा संध्या प्रदर्शिता वर्तते। मनुष्यैः दिवारात्रौ अज्ञानात्कृत पापानां निवारणाय त्रिकालसंध्या आवश्यकी ।

उक्तं हि -

विप्रो वृक्षः तस्यमूलं हि संध्याः वेदाः शाखाः धर्मकर्माणि पत्रे ।

तस्मान्मूलं यत्नतो रक्षणीयं छिन्ने मूले नैव वृक्षं शाखाः ।।

ब्राह्मणः वृक्षः, ब्राह्मणस्य मूलं संध्या। चत्वारो वेदाः शाखास्वरुपाः धर्मकर्माणि पत्ररूपे स्तः । अतः प्रयत्नपूर्वकं मूलस्य रक्षणं कर्तव्यं अन्यथा मूले नष्टे वृक्षः शाखाः च नश्यन्ति ।

उत्तमा तारकोपेता मध्यमा लुप्ततारका ।

अधमा सूर्यसहिता प्रातः संध्या त्रिधामता ।।

ब्रह्ममूहुर्ते तारानक्षत्रयुक्ता प्रातः संध्या उत्तमा ज्ञेया । लुप्ततारका संध्या मध्यमा ज्ञेया । सुर्योदयानन्तरं कृता संध्या अधमा ज्ञेया ।

जपः-

" यज्ञानां जप यज्ञोऽस्मि" इति धिया प्रतिदिनं सर्वैः मनुष्यैः जपयज्ञः कर्तव्यः । ब्राह्मणैः गायत्रीजपः अन्यैश्च स्व वर्णस्य गायत्रीजपः व दीक्षितस्य मन्त्रस्य, इष्टदेवस्य वा कुलदेवतायाः मन्त्रस्य जपकर्म कूर्यात् ।

तर्पणम्-

वैदिकपरम्परायां तर्पणस्यापि महत्वं वर्तते ।तर्प्यते अनेन इति तर्पणम् । देवर्षिपितृ मनुष्य ऋणान् मुक्तयेऽवश्यमेव तर्पणं कर्तव्यम् ।

**यथा शुचि स्थलं वा स्यादुदके देवताः पितृन् ।**

**तर्पयेच्च यथाकाममप्सु सर्व प्रतिष्ठितम् ।।**

देवपूजनम्-

देवर्णं प्रतिहर्तुं प्रतिदिनं पञ्चायतन्देवतानां पूजनं कर्तव्यं । गणेशः,देवी,विष्णुः,सूर्यः,शिवः पञ्चायतन्देवताः । यथालाभोपचारैः वा षोडशोपचारैः पूजनं कूर्यात् ।

**आवहनमासनञ्च पाद्यम् अर्घ्यं तथाचमनम् ।**

**स्नानं वस्त्रोपवीतं च गन्धमाल्याध्यनुक्रमात् ।।**

**धूपं दीपं च नैवेध्यं ताम्बूलं च प्रदक्षिणा ।**

**पुष्पान्जलिरिति प्रोक्ता उपचारास्तु षोडशः ।।**

वैश्वदेवः-

बलिर्वैश्वदेवः ।भूतयज्ञः । गृहस्थजनाः प्रतिदिनं पञ्च पापानि कुर्वन्ति । तस्मान् मुक्तये पञ्चमहायज्ञाः प्रकर्तव्याः ।

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथि पूजनम् ।।**